हे इन्द्र काव्यः उशना नर्यः त्वं यान् वहिष्ठान् वातस्य सुयुजः नॄन् अवः (तैः सह धर्मे तिष्ठ) यः वृत्रहणं मन्दिनं पार्यं जनं दात् यः (शत्रूणाम् उपरि) वज्रं ततक्ष (तेन अपि सह धर्मेण वर्तस्व)॥

TRANSLATION

O King the protector of the people, thou who art the son of a very wise man and desirous of doing noble deeds, benefactor of men, protectest the Yogis who lead us to the attainment of Vidya (wisdom) and Dharma (righteousness) and who practise Pranayam. Thou shouldst remain with them in Dharma. Thou shouldst also treat with Dharma (righteousness) the person whom a wise man has given to thee (for help), who is an admirable hero, killer of his enemies, accomplisher of his works and thrower of thunderbolt over his foes.

PURPORT

As the officers of the State protect the worshippers of God, teachers, preachers and other good persons belonging to the general public and army, so they should also protect them continuously.

THE COMMENTATOR'S NOTES

(नॄन्) धार्मिकान् जनान्

= Good righteous persons.

(वहिष्ठान्) अतिशयेन वोढॄन् विद्याधर्मप्रापकान्

= Leading to the attainment of Vidya (Wisdom) and Dharma (righteousness).

TRANSLATOR'S NOTES

It is strange to find that while Rishi Dayananda has interpreted नॄन् as धार्मिकान् जनान् good or righteous persons, Sayanacharya has taken it as नेतॄन् अश्वान् = Leading horses, He has taken वातस्य सुयुजः, वहिष्ठान् also adjectives of the horses, instead of the adjectives of नॄन् or good men. There is no word in the Mantra standing for horses, while as the word used in the Mantra is नॄन् which every one knows means men. It is for impartial scholars to judge whose interpretation is far-fetched Shri Sayanacharya's or Rishi Dayananda Sarasvati's.

पुनस्तमेव विषयमाह

The same subject is centinued.

Mantra—13

त्वं सूरो हरितो रामयो नॄन्भरच्चक्रमेतशो नायमिन्द्र ।
प्रास्य पारं नवतिं नाव्यानामपि कर्तमवर्तयोऽयज्यून् ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे इन्द्र ! त्वम् अयं सूरः हरितः इव एतशः चक्रं न अयज्यून् नॄन् भरत् । नाव्यानां नवतिं – नवति संख्या-

कानि जलगमनार्थानि यानानि पारं प्रास्य एतान् पुरुषार्थिनः अपि कर्तं खनितुम् कर्म कर्तुं च प्रवर्तयः (त्वम् अत्र अस्मान् सदा) रमयः ॥

TRANSLATION

O Indra ! President of the Assembly who art giver of much wealth; as the sun yokes the rays and the good horse makes the wheel to move, in the same manner, thou supportest those leaders of the people and of righteousness who are not attached to worldly objects. Take across ninety cars (that are to be used for travel on the sea) or sea-journey to the sea-shore. Use industrious persons to dig the well and other useful activities and make us always happy.

PURPORT

As the sun prompts all to do their deeds, in the same manner, it is the duty of the learned to prompt the ignorant to do some mental or physical work according to their ability or aptitude and accomplish all happiness.

THE COMMENTATOR'S NOTES

(हरितः) रश्मीन् हरित इति रश्मिनाम (निघ० १.६)
= Rays.

(नॄन्) प्रजाधर्मनायकान्
= The leaders of the people and of righteousness.

(एतशः) साधुरश्वः एतश इत्यश्वनाम (निघ० १.१४)
= Good horse, quick going horse.

(कर्तम्) कूपम् कर्तमितिकूपनाम (निघ० ३.२३)
= Well.

TRANSLATOR'S NOTES

The most difficult part of the Mantra is नवतिं नाव्यानाम् = Which Sayanacharya translates as नावा तार्याणांनदीनां नवतिं नवति संख्याम् i. e. ninety rivers to be taken across the steamer.

Rishi Dayananda Sarsvati takes नवतिं नाव्यानाम् as नवति संख्याकानि जलगमनार्थानि यानानि = Ninety cars useful for sea-Journey. But the exact significance of the number 90 is still a matter for further research. We shall be grateful to any scholar who can throw further light on the subject.

(अयज्यून्) असंगतिकर्त्तॄन् = Free from attachment.

(यज-देवपूजासंगतिकरणदानेषु)

पुनस्तमेव विषयमाह ।

Mantra--14

त्वं नो॑ अस्या इ॑न्द्र दुर्हणा॑याः पाहि व॑ज्रिवो दुरितादभीके॑ ।
प्र नो॒ वाजा॑न्रथ्यो॒३ अश्व॑बुध्यानिषे य॑न्धि श्रव॑से सूनृता॑यै ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे वज्रिवः इन्द्र ! रथ्यः त्वम् अभीके अस्याः दुर्हणायाः दुरितात् च नः पाहि । इषे श्रवसे सूनृतायै नः अस्माकम् अश्वबुध्यान् वाजान् सुखं प्रयन्धि ॥

TRANSLATION

O Indra (Commander of the army) thou who hast reasonable and wise policies and art destroyer of un-righteousness being a good charioteer, protect us in the battle from a powerful army which it is so difficult to destroy and from sinful activities. Bestow happiness upon our kith and kin who are endowed with knowledge and speed (strength) and who are able to direct or utilise lightning and electricity etc. in the firmament for the attainement of noble desire for fame or good food and for pleasant and true speech.

PURPORT

It is the duty of the commander of army to keep away his army from the destruction by the foes and from ignoble or sinful activities. He should provide the heroes of his army with nourishing and invigorating good food and drink

in sufficient quantity to their hearts content, thus to gladden them, to conquer the enemies and to protect and preserve the subjects constantly.

THE COMMENTATOR'S NOTES

(इन्द्र) अधर्मविदारक

= Destroyer of un-righteousness.

(अभीके) संग्रामे अभीक इति संग्रामनाम (निघ० २.१७) = In the battle.

(अश्वबुध्न्यान्) अश्वान् अन्तरिक्षे भवान् अग्न्यादीन् चालयितुं वर्द्धितुम् बुध्यन्ते तान्

= Able to utilise lightning, electricity etc. in the firmament.

(वाजान्) विज्ञानवेगयुक्तान् सम्बन्धिनः

= The kith and kin endowed with knowledge and strength (denoted by speed).

(वज-गतौ गतेस्त्रयोऽर्थाः ज्ञानं गमनं प्राप्तिश्च)

(वज्रिवः) प्रशस्ताः वज्रयः – विज्ञानयुक्ता नीतयो विद्यन्तेऽस्य तत्सम्बुद्धौ । वजधातोरौणादिकः इः प्रत्ययः रुडागमश्च ततो मतुप्च

= Whose policies are reasonable and wise.

अथेश्वर विषयमाह ।

In the last and concluding Mantra of the hymn, the prayer is addressed to God as Indra.

Mantra – 15

मा सा ते अस्मत्सुमतिर्वि दसद्वाजप्रमहः समिषो वरन्त ।
आ नो भज मघवन्गोष्वर्यो मंहिष्ठास्ते सधमादः स्याम ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे वाजप्रमहः मघवन् (जगदीश्वर) ते (तव) कृपया या सुमतिः सा अस्मत् मा विदसत् (कदाचित्) सर्वे जनाः इषः संवरन्त । अर्यः त्वम् नः (अस्मान्) गोषु आभज यतः मंहिष्ठाः सन्तः वयं ते (तव) सधमादः स्याम ॥

TRANSLATION

O Lord of the world, ever to be worshipped by the wise and thorough wisdom, by Thy Grace, may not good intellect or wisdom be ever withdrawn from us. May it ever remain with us. May all people have good food and the fulfilment of their noble desires. Make us possessors of the land, good speech, cattle and light of Dharma O Lord, so that ever growing with happiness, wisdom, knowledge and other virtues, may we ever be full of great bliss with Thee.

PURPORT

Men should always regard God as the Lord of the world and should pray to Him for the attainment of good intellect or wisdom etc. so that imitating God's pure attributes and acts, they may always remain in bliss with Him.

THE COMMENTATOR'S NOTES

(वाजप्रमहः) वाजैः विज्ञानादिभिः विद्वद्भिर्वा प्रकृष्टतया मह्यते पूज्यते यस्तत्सम्बुद्धौ ।

= Who is worshipeed well with wisdom and by the wise.

(गोषु) पृथिवीवाणी धेनुधर्मप्रकाशेषु

= In the land, good speech, cattle and the light of Dharma.

(सधमादः) महानन्दिताः = Full of great bliss.

TRANSLATOR'S NOTES

गौरिति पृथिवी नाम (निघ० १.१)

गौरिति वाङ्नाम (निघ० १.११)
गौरिति रश्मिनाम निरुक्ते २.१.८ अत्र धर्मरश्मि ग्रहणम्

This hymn is connected with the previous hymn, as there is mention of the duties of the husband and wife, king and his subjects etc. as in that hymn.

Here ends the commentary on first Ashtaka of the first Mandala of the Rigveda Samhita

ओ३म्

SECOND ASHTAK FIRST CHAPTER

अथ द्वितीयाष्टकारम्भः

तत्र प्रथमोऽध्यायः

ऋग्वेदस्य प्रथममण्डलस्य द्वाविंशत्युत्तरशततमं सूक्तम्

MANDALA—I, HYMN CXXII (122)

ओं विश्वानि देव सवितर्दुरितानि परासुव ।
यद् भद्रं तन्न आसुव ।। यजु० ३२

अस्य पंचदशर्चस्य सूक्तस्य कक्षीवान् ऋषिः । विश्वे देवा देवताः । १, ५, १४ भुरिक् पंक्तिश्छन्दः । ४ निचृत् पंक्तिः । ३, १५ स्वराट् पंक्तिः । ६ विराट् पंक्तिश्छन्दः पंचमः स्वरः । २, ६, १०, १३ विराट् त्रिष्टुप् छन्दः । ८, १२ निचृत् त्रिष्टुप् । ७, ११ त्रिष्टुप् छन्दः । धैवतः स्वरः ।।

Seer of the Hymn-Kaksheevan. Devata or subject-Vishve Devah. Metres-Pankti and Trishtup. Tunes-Panchama and Dhaivata.

तत्रादौ सभापतिकार्यमुपदिश्यते ।

In the first Mantra, the duties of the President of the Assembly are taught.

Mantra—1

प्र वः पान्तं रघुमन्यवोऽन्धो यज्ञं रुद्राय मीळ्हुषे भरध्वम् ।
द्विवो अस्तोष्यसुरस्य वीरैरिषुध्येव मरुतो रोदस्योः ।।

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे रघुमन्यवः । रोदस्योः मरुतः इव इषुध्याइव वीरैः सह वर्तमानाः यूयं मीळ्हुषे रुद्राय वः पान्तं यज्ञम् अन्धः च दिवः असुरस्य सम्बन्धे वर्तमानान् यथा प्रभरध्वं तथा अहम् अपि एतम् अस्तोषि ।।

TRANSLATION

O Mild tempered men, you who are like the winds between the sun and the earth, who are like the heroes with their shafts, present to the President of the Assembly who is giver of happiness to good persons and who causing the wicked to weep by meting out severe punishment and thus protects you, respect the food that is to be prepared by the Combination of various articles. Give light of knowledge to the ignorant. I also praise the virtuous President of the Assembly.

PURPORT

When with the help of able and competent persons, men attempt to do a thing, even the difficult task can be accomplished easily.

THE COMMENTATOR'S NOTES

(रघुमन्यवः) लघुक्रोधाः

= Men of little or no anger-Mild tempered.

(अन्धः) अन्नम् = Food.

(यज्ञम्) संगतव्यम्

= To be unified or prepared with the combination of various articles.

(दिवः) विद्याप्रकाशस्य

= Of the light of knowledge.

TRANSLATOR'S NOTES

अन्ध इत्यन्ननाम (निघ० २.७)

यज-देव पूजा संगति करण दानेषु।

दिवु- क्रीडा विजिगीषा व्यवहारद्युतिस्तुतिमोदमद-स्वप्न कान्ति गतिषु

Here the meaning of द्युति or light has been taken.

अथ दम्पत्योर्व्यवहारमाह ।

Now the duties or dealings of the husband and wife are told in the second Mantra.

Mantra—2

पत्नीव पूर्वहूंतिं वावृधध्यां उषासानक्तां पुरुधा विदांने ।
स्तरीर्नात्कं व्युंतं वसांना सूर्यस्य श्रिया सुदृशी हिरंण्यैः ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे सति स्त्रि ! त्वं पत्नी इव ववृधध्ये पूर्वहूतिं पतिं स्वीकृत्य पुरुधा विदाने उषासानक्तेव (वर्तस्व) सूर्यस्य हिरण्यैः श्रिया च सुदृशी अत्कम् इव व्युतं वसाना सती स्तरीः न सततं भव ॥

TRANSLATION

O Chaste woman ! be thou like a noble wife who always reveres her husband and attends to his first call helping him to grow (physically mentally and spiritually.) Let the husband and wife be like the morning and night who uphold all and let them be highly learned. Let the wife be full of splendour like the light of the sun, beautiful and good looking, putting on well-woven robes. Be like the well O wife feeding all with sweet water and like the boat taking your husband and other kith and kin across the river of misery.

PURPORT

A chaste wife always pleases her noble husband and husband observing the vow of fidelity or faithfulness, pleases his wife. They should be like the day and night, associated

with each other, adorned with nice dress and ornaments. They should always endeavour to do noble deeds.

THE COMMENTATOR'S NOTES

(स्तरीः) कलायन्त्रादिसंयोगेनास्तारिषत यास्ता नौकाः

= Boats driven by machines etc.

(अत्कम्) कूपम् इव = Like the well.

(हिरण्यैः) ज्योतिभिः इव

= Like the splendours of the sun.

ज्योतिर्वै शुक्रं हिरण्यम् (ऐतरेय० ७. १२)

ज्योतिर्हि हिरण्यम् (शतपथ ४. ३. १. ११)

ज्योतिर्वै हिरण्यम् (ताण्ड्य ६. ६. १०)

अथ सद्गुणानां व्यवहारमाह ।

The cultivation of virtues is taught in the third Mantra.

Mantra—3

म॒मत्तु॑ नः॒ परि॑ज्मा वस॒र्हा म॒मत्तु॒ वातो॑ अ॒पां वृष॑ण्वान् ।
शि॒शी॒तमि॑न्द्रापर्वता यु॒वं न॒स्तन्नो॒ विश्वे॑ वरिवस्यन्तु दे॒वाः ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

यथा वसर्हा परिज्मा नः ममत्तु अपां वृषण्वान् वातः नः ममत्तु । हे इन्द्रापर्वता इव (वर्तमानौ अध्यापकोपदेशकौ) युवं नः शिशीतम् विश्वे देवाः नः वरिवस्यन्तु तथा तत् (तान्) सर्वान् सत्कृतान् वयं सततं कुर्याम ॥

TRANSLATION

May fire that consumes all and is the sustainer of many things delight us. May the wind, the shedder of rain gladden us. O teacher and preacher, you who are like the sun and the cloud sharpen our intellects. May all enlightened persons show us favour.

PURPORT

We must also please and satisfy those persons, who try to please and gladden us.

THE COMMENTATOR'S NOTES

(ममत्तु) हर्षयतु = May delight.

(परिज्मा) परितः जमति अत्ति सः अग्निः
= Fire that consumes on all sides.

(इन्द्रपर्वता) सूर्यमेघाविव वर्तमानौ अध्यापकोपदेशकौ
= The teacher and preacher who are like the sun and the cloud.

(वरिवस्यन्तु) परिचरन्तु = Serve or favour.

TRANSLATOR'S NOTES

ममत्तु is from मदी-हर्षे । जमु-अदने भ्वा

पर्वत इति मेघनाम [निघ० १.१०]

एष एवेन्द्रो य एष [सूर्यः] तपति [शतपथ २.६.४.१२]

स यः स इन्द्रः एष एव स य एष [सूर्यः] तपति [जैमिनीयोपनिषद्ब्राह्मणे १. २८. २]

पुनस्तमेव विषयमाह ।

The same subject is continued.

Mantra—4

उत त्या मे॑ य॒शसा॑ श्वेत॒नायै॑ व्यन्ता॒ पान्तौ॑शि॒जो हु॒वध्यै॑ ।

प्र वो॒ नपा॑तम॒पां कृ॑णुध्वं॒ प्र मा॒तरा॑ रास्पि॒नस्या॒योः ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे मनुष्याः ! यथा मे यशसा श्वेतनायै व्यन्ता पान्ता त्या हुवध्यं मातरा रास्पिनस्य आयोः वर्तनाय प्रवर्तते यथा अपान्नपातं यूयं प्रकृणुध्वं तथा उत औशिजः अहं च आयुः सततं प्रवर्द्धयेयम् ॥

TRANSLATION

O men, as I the son of a person desiring wisdom for my good reputation invoke the teachers and preachers who are mighty protectors and who make me respectable, you should also do so. They are engaged in multiplying the usefulness and strength of my life. You should not allow the water to fall down uselesaly,but should utilise it for various purposes. May I also try to augment the span of your life by giving instructions about health.

PURPORT

O men, as you increase our age or the span of our life by your noble teachings, so we should also ennoble and uplift your life.

THE COMMENTATOR'S NOTES

(श्वेतनायै) प्रकाशाय = For light.

(रास्पिनस्य) आदातुमर्हस्य
= Noble or worthy of acceptance.

(मातरा) मानकारकौ
= Respecters or making us respectable.

(औशिजः) कामयमानपुत्रः
= The son of a man desiring wisdom.

TRANSLATOR'S NOTES

(औशिजः) उशिजः पुत्रः वश-कान्तौ

पुनस्तमेव विषयमाह

The same subject is continued.

Mantra—5

आ वो॑ रु॒वण्यु॑मौ॒शि॒जो हु॒वध्यै॒ घोषे॑व॒ शंस॒मर्जु॑नस्य॒ नंशे॑ ।

प्र वः॑ पू॒ष्णे दा॒वन॒ आँ अच्छा॑ वोचेय व॒सुता॑तिम॒ग्नेः ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे विद्वांसः औशिजः अहं वः रुवण्युम् आहुवध्यै अर्जुनस्य शंसं घोषा इव (दुःख) नंशे वः पूष्णे दावने अग्नेः वसुतातिं प्र अच्छा वोचेय ॥

TRANSLATION

O learned men, I the son of a man desiring knowlenge and wisdom, praise you earnestly to put into practice your sermons, to alleviate all miseries and to beautify myself with noble virtues, like the speech of absolutely truthful enlighetned persons. Let me do so for nourishment and charity, after earning wealth by the use of fire in the form of electricity etc.

PURPORT

As the Vaidyas (Physicians) make all people healthy and destroy their diseases, in the same manner, all learned men should make all happy, respectable, and well-established in life.

THE COMMENTATOR'S NOTES

(घोषेव) आप्तानां वाक् इव

= Like the speech of absolutely truthful persons.

(अर्जुनस्य) रूपस्य अर्जुनमिति रूपनाम (निघ० ३.७)

(रुवण्युम्) सुशब्दायमानम् ॥

= Teaching well.

पुनस्तमेव विषयमाह

The same subject is continued.

Mantra—6

श्रुतं मे मित्रावरुणा हवेमोत श्रुतं सदने विश्वतः सीम् ।
श्रोतु नः श्रोतुरातिः सुश्रोतुः सुक्षेत्रा सिन्धुरद्भिः ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे मित्रावरुणा सुश्रोतुः मे इमा हवा श्रुतम् उत (अपि) सदने विश्वतः सीं श्रुतम् अद्भिः सिन्धुः सुक्षेत्रा इव श्रोतुरातिः नः वचनानि श्रोतु ॥

TRANSLATION

O good friends, listen to those my invocations (calls). Listen to them when they are made in an assembly or any other boundary in all directions. May the renowned generous bestower of wealth listen to our requests who hear well and attentively and may he favour us with noble sermons as a river fertilises broad fields with water.

PURPORT

It is the duty of great scholars to listen attentively to the questions put to them and to answer them satisfactorily.

THE COMMENTATOR'S NOTES

[मित्रावरुणौ] सुहृद्वरौ = Good friends.

[सदने] सदसि = In the assembly.

[सीम्] सीमायाम् = In the boundary.

पुनस्तमेव विषयमाह

The same subject is continued.

Mantra—7

स्तुषे सा वां वरुण मित्र रातिर्गवां शता पृक्षयामेषु पज्रे ।
श्रुतरथे प्रियरथे दधानाः सद्यः पुष्टिं निरुन्धानासो अग्मन ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

यथा विद्वांसः पज्रे श्रुतरथे प्रियरथे सद्यः पुष्टिं दधानाः दुःखं निरुन्धानासः अग्मन् तथा हे वरुणमित्र

युवां पृक्षयामेषु गवां शता गच्छतम् या युवयोः रातिः स्त्री सा वां (युवां) यथा स्तुषे (तथा अहम् अपि स्तौमि) ॥

TRANSLATION

As learned persons mounting on their quick - going famous and favorite car come having nourishing food in abundance and alleviating suffering of others, in the same way, O ye exalted or excellent scholars and friends, come to those Brahamacharis who are enquirers and observers of the rules of self-restraint to give them hundreds of inspiring words. As your wives who are givers of joy to you admire you immensely, so I also do.

PURPORT

As learned persons manufacture many kinds of wonderful vehicles, industriously, so others also should do.

THE COMMENTATOR'S NOTES

(रातिः) या राति-ददाति (सुखं) सा स्त्री

= Wife who gives joys to her husband.

(पज्रे) गमने = Quick moving.

(पृक्षयामेषु) पृच्छ्यन्ते ये ते पृक्षास्तेषामिमे यामास्तेषु अत्र पृच्छ धातोर्बाहुलकादौणादिकः क्सः प्रत्ययः ।

= Inquisitive observers of the rules of self-restraint.

पुनस्तमेव विषयमाह

The same subject is continued :

Mantra—8

अस्य स्तुषे महिमघस्य राधः सचा सनेम नहुषः सुवीराः ।

जनो यः पज्रेभ्यो वाजिनीवानश्वावतो रथिनो मह्यं सूरिः ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे विद्वन् ! त्वम् अस्य अश्ववतः रथिनः महिमघस्य जनस्य राधः स्तुषे तस्य तत् सुवीराः वयं सचा सनेम यः

नहुषः जनः पज्रेभ्यः वाजिनीवान् जायते स सूरिः मह्यम् एतां विद्यां ददातु ॥

TRANSLATION

O learned person ! Thou praisest the wealth of this man who has many horses and many chariots or cars and is prosperous. May we get his wealth distributed among the needy being ourselves heroic and having good progeny. May the man who being tied to good and bad deeds becomes doer of noble actions sanctioned by the Vedas mounting on quick moving cars, instruct me in this science.

PURPORT

As an industrious person bemomes prosperous, so shoul other also be.

THE COMMENTATOR'S NOTES

(नहुषः) शुभाशुभकर्मबद्धो मनुष्यः

= man tied or bound by good or bad deeds.

(वज्रेभ्यः) गमकेभ्यो यानेभ्यः

= By quick moving vehicles.

पुनस्तमेव विषयमाह

The same subject is continued.

Mantra—9

जनो यो मित्रावरुणावभिध्रुगपो न वां सुनोत्यक्ष्णयाध्रुक् ।
स्वयं स यक्ष्मं हृदये नि धत्त आप यदीं होत्राभिर्ऋतावा ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे सत्योपदेशकयाजकौ ! यः जनः वाम् अपः मित्रावरुणौ इव अभिध्रुक् अक्ष्णयाध्रुक् सन् न सुनोति स स्वयं हृदये यक्ष्मं निधत्ते यद् (यः) ऋतावा होत्राभिः ईम् आप स हृदये सुखं निधत्ते ॥

TRANSLATION

O Preacher of truth and priest, he who does you who are like Prana and udana wrong, who harms you in any way crookedly, contracts for himself serious diseases like T. B. in his heart, but he who being true in his dealings attains you by noble, acceptable or admirable acts enjoys happiness.

PURPORT

The man who hates or harms learned benevolent persons remains always miserable and he who satisfies and serves them, enjoys happiness.

THE COMMENTATOR'S NOTES

(मित्रावरुणौ) प्राणोदानाविव सत्योपदेशकयाजकौ

= The Preacher of truth and priest.
who are like Prana and Udana–Two kinds of vital energy

(यक्षण्याध्रुक्) कुटिलया रीत्या द्रुह्यति

= He who harms or injures crookedly.

TRANSLATOR'S NOTES

प्राणोदानौ मित्रावरुणौ (शत० १.८.३.१२) शत० ३.६.१.१६, ५.३, ५, १४।

अथ युद्धविषय उपदिश्यते ।

The Science of warefare is taught in the tenth Mantra.

Mantra—10

स व्राधतो नहुषो दंसुजूतः शर्धस्तरो नरां गूर्तश्रवाः ।
विसृष्टरातिर्याति वाळ्हसृत्वा विश्वासु पृत्सु सदमिच्छूरः ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

यः दंसु जूतः गूर्तश्रवा विसृष्टरातिः वाळ्हसृत्वा नहुषः

नरां विश्वासु पृत्सु सद्य इति गृहीत्वा व्राधतः युद्धाय याति (स विजयम् प्राप्नोति ।।)

TRANSLATION

The man who is urged by heroes who are destroyers of enemies renonwed among men, industrious, endowed with surpassing strength, munificent is gifts, ever undaunted in all combats even against mighty men goes to fight with his foes, gets victory.

PURPORT

Men should have more war-materials than their enemie's and should conquer them with the help of great heroes.

THE COMMENTATOR'S NOTES

(नहुषः) मनुष्यः

(वंसुजूतः) योवंसुभिरुपक्षयितृभिः वीरैर्जूतः प्रेरितः सः
= Urged by the heroes who are destroyers of their enemies.

(बाढ सृत्वा) यो बाढ़ेन प्रशस्तेन बलेन सरति सः
= He who moves, with admirable strength

(सदम्) शत्रुहिंसकसैन्यम्
= The army of the destroyers of enemies.

TRANSLATOR'S NOTES

दसु-उपक्षये जु-गतौ सौत्रोधातुः
सृ-गतौ षद्लृ-विशरणगत्यवसादनेषु

पुनरुपदेशककृत्यमाह

The duties of a preacher are told in the eleventh Mantra.

Mantra—11

अध॑ रमन्ता नहुषो हवं सूरेः श्रोता राजानो अमृतस्य मन्द्राः ।
नभोजुवो यन्निरवस्य राधः प्रशस्तये महिना रथवते ।।

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे मन्द्राः राजानः ! यूयम् अमृतस्य सूरेः नहुषस्य हवं श्रोत नभोजुवः यूयम् यद् निरवस्य राधः तत् रमन्तः प्रथ महिना प्रशस्तये रथवते राधः दत्त ॥

TRANSLATION

O Kings shining on account of your virtues, causing delight to all, listen to the words of advice of a scholar who regards himself immortal (spiritually), you who travel in the sky (by a eroplanes) protect the wealth of a poor man who has no guardian, grant wealth to that admirable who has person many chariots or who is the master of his chariot in the from of body.

THE COMMENTATOR'S NOTES

(हवम्) उपदेशाख्यं शब्दम्

= Worlds uttered in the form of sermons.

(नभोजुवः) विमानादिना नभांसि गच्छन्तः

= Travelling in the sky by air crafts etc.

पुनस्तमेव विषयामाह

The same subject is continued :

Mantra—12

एतं शर्धं धाम यस्यं सूरेरित्यवोचन्दशतस्य नंशे ।

द्युम्नानि येषुं वसुतातीं रारन्विश्वें सन्वन्तु प्रभृथेषु वाजंम् ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

वसुतातिः अहं यथा दशतयस्य सूरेः सकाशात् यत् शर्द्धं धाम् अवोचन् । ये विश्वे वाजं राजन् येषु प्रभृथेषु द्युम्नानि सन्वन्तु इति तत् एतं सर्वं सेवित्वा दुःखानि नंशे ॥

TRANSLATION

I who am possessed of wealth, destroy all my miseries by acquiring powerful position which is told by great scholars who are well-versed in tenfold knowledge Those scholars give that knowledge of ten kinds to all. In the Yajnas where all virtues are particularly preserved, there is all good reputation and real wealth. Let the scholars diffuse knowledge and distribute food and wealth among the needy.

PURPORT

Those great scholars who having acquired the knowledge of all sciences teach others, become glorious and famous.

THE COMMENTATOR'S NOTES

(दशतयस्य) दशधाविद्यस्य

= A scholar who possesses tenfold knowledge.

(वाजम्) ज्ञानम् अन्नं वा = Knowledge or food.

(द्युम्नानि) यशांसि धनानि वा = Fame or wealth.

TRANSLATOR'S NOTES

दशतयस्य has been translated by Rishi Dayananda Sarasvati as दशधा विद्यस्य = Possessing tenfold knowledge but not explained. In our opinion, it may mean the knowledge of the four Vedas which are encyclopedia of various sciences with six Angas (Branches) (or limbs consisting) of शिक्षा (The science of alphabets, and their accents etc.) व्याकरण Grammar कल्प (The science of rituals, ceremonies, Yajnas etc.) ज्योतिष (The various branches of Astronomy) निरुक्त (Vedic etymology including true philology and) छन्द (The Science of metres). This tenfold knowledge thus covers all the departments of various sciences.

वाज इति अन्ननाम (निघ० २.७)

वाज is derived from वज-गतौ the first meaning of which is ज्ञान or knowledge.

द्युम्नम् इति धननाम (निघ० २.१०) द्युम्नं द्योततेर्यशो वा अन्नंवेति निरुक्ते प्रभृथेषु has not been explained in the commentary by oversight. Sayanacharya interprets it as प्रकृष्टभरणेषु यागेषु = In the Yajnas which sustain all well. It is strange to note that Sayanacharya explains वसुताति as वसूनां हविर्लक्षणानां धनानां वा विस्तारयितार ऋत्विज. । वचन व्यत्यय: Rishi Dayananda Sarswati's interpretation is simple and clear धनाद्यैश्वर्ययुक्त:–Possesor of wealth.

पुनस्तमेव विषयमाह ।

The same subject is continued :

Mantra – 13

मन्दामहे दशतयस्य धासेर्द्विर्यत्पञ्च बिभ्रतो यन्त्यन्ना ।
किमिष्टाश्व इष्टरश्मिरेत ईशानासस्तरुष ऋञ्जते नॄन् ॥

सन्धिच्छेदसहितोऽन्वय: (ऋषिकृत:)

यत् (ये) पंच दशतयस्य धासे: विद्याम् अन्ना च द्वि: यान्ति ये एते ईशानास: तरुष: ऋञ्जते (प्रसाध्नुवन्ति) तान् बिभ्रत: नॄन् (जनान्) वयं मन्दामहे (तच्छिक्षां प्राप्य जन:) इष्टाश्व: इष्टरश्मि: किं न जायते ?

TRANSLATION

We admire those five kinds of men-teachers, preachers, students, hearers of sermons and other ordinary persons who twice receive knowledge from scholars possessing the tenfold knowledge and food from scholars of wisdom and happiness. We also admire those lords of wealth who support learned men dispelling all darkness and helping them to accomplish their works. Will not a man become master of his horses in the form of ten senses and controller of his reins in the form of mind ?

PURPORT

Those who do not serve great scholars who endow all with good education and thus able to accomplish noble tasks cannot enjoy desirable happiness.

THE COMMENTATOR'S NOTES

(मन्दामहे) स्तुमः = We praise or admire.

(पंच) अध्यापकोपदेशकाध्येत्र्युपदेश्यसामान्याः

= Five kinds of persons i. e teachers, preachers, students, hearers of sermons and ordinary men.

(इष्टरश्मिः) इष्टाः संयोजिताः रश्मयो येन

= He who has yoked or controlled the reins (in the form of mantal attitudes).

(इष्टाश्वः) इष्टाः संगता अश्वा यस्य

= Who has control over his horses (particularly) in the form of the senses.

The following passages from the Kathopanishat throw light on the last two words.

आत्मानं रथिनं विद्धि, शरीरं रथमेव तु ।
बुद्धि तु सारथि विद्धि, मनः प्रग्रहमेवच ।।
इन्द्रियाणि हयानाहुः विषयांस्तेषु गोचरान् ।।
(कठोपनिषत् १. ३. ३-४)

Which mean—

Know the soul to be the Master of the chariot which is this body. Intellect is the charioteer. Mind is the rein. The senses are the horses and their objects are the roads.

मन्दामहे-मदि-स्तुतौ इदित्वान्नुम् ।
पुनस्तमेव विषममाह ।

The same subject is continued :

Mantra--14

हिरण्यकर्णं मणिग्रीवमर्णस्तन्नो विश्वे वरिवस्यन्तु देवाः ।
अर्यो गिरः सद्य आ जग्मुषीरोस्राश्चाकन्तूभयेष्वस्मे ।।

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

ये विश्वदेवाः नः जग्मुषीः गिरः सद्यः आचकन्तु उभयेषु अस्मे च यत् अर्णः कामयेरन् यः अर्यः जग्मुषीः गिरः

उस्राः च कामयते तं हिरण्यकर्णं मणिग्रीवं तत् अस्मान् च आ वरिवस्यन्तु तान् एतान् प्रतिष्ठापयेम ।।

TRANSLATION

Let us honour those venerable enlightened persons who serve and protect those business men who know or desire to know the languages of various lands, who desire to serve all their Kith and Kin and strangers with good pure cold drinks and serve the cows, who are decorated with golden ear-rings and Jewels, necklaces.

PURPORT

Those learned persons are always to be respected who make their sons and daughters highly educated. Those traders are also to be honoured who having learnt the languages of various contries and having brought wealth from distant lands through business become rich.

THE COMMENTATOR'S NOTES

(अर्णः) सुसंस्कृतम् उदकम्

= Pure and refined water or cold drinks of various kinds.

(उस्राः) गावः = Cows.

TRANSLATOR'S NOTES

अर्णइत्युदकनाम (निघ० १.१२)

उस्रा इति गोनाम (निघ० २.११)

अथ राजधर्मविषयमाह

The duties of a King are told now in the fifteenth Mantra.

Mantra—15

चत्वारो॑ मा मशर्शा॒रस्य॑ शि॒श्व॑स्त्र॒यो॑ रा॒ज्ञ आय॑वसस्य जि॒ष्णोः ।
रथो॑ वां मित्रावरुणा दी॒र्घाप्साः स्यूम॑गभस्तिः॒ सूरो॒ नाद्यौ॑त् ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे मित्रावरुणा यः वांरथः स मा (मां) प्राप्नोतु यस्य मशर्शारस्य श्रायवसस्य जिष्णोः राज्ञः स्यूमगभस्तिः सूरः न रथः श्रद्योत् तथा यस्य दीर्घाप्सा: चत्वारः त्रयः च शिश्वः स्युः स राज्यं कर्तुम् श्रर्हेत् ॥

TRANSLATION

O good friends, may your chariot come to my house. He alone deserves to rule who is a destroyer of bad words or is a man of noble words, who keeps all necessary articles in abundance, who is victorious, whose chariot shines like the sun of bright rays, and who has in his State four Varnas, four Ashramas and three-President, subjects and servants under control and virtuous.

PURPORT

The King of whose State the four Varnas (Classes) and four Ashramas (Stages of (life) are endowed with knowledge and good education, determined by merits, actions and temperaments and who has good army, subjects and Judges, shines like the sun with good reputation and glory..

THE COMMENTATOR'S NOTES

(मशर्शारस्य) यः मशान् दुष्टान् शब्दान् शृणाति हिनस्ति । श्रत्र पृषोदरादि पूर्व पदस्य रुगागमः

= Who destroys all ignoble words or is a man of noble words.

(चत्वारः) वर्णा श्राश्रमाश्च ।

= Four classes and four Ashramas (Stages of life).

(शिश्वः) शासनीयाः

= To be ruled or controlled.

(श्रायवसस्य) पूर्णसामग्रीकस्य

= Or him who keeps all necessary articles in abundance.

शृ-हिंसायाम् मश-शब्दे रोषकृते च
चत्वारो वर्णाः– ब्राह्मणक्षत्रियवैश्यशूद्राः
चत्वारः आश्रमाः – ब्रह्मचर्य गृहस्थ वानप्रस्थसंन्यासाः

It is very wrong on the part of Sayanacharya, Prof. Wilson, Griffith and others to take Masharshara and Ayavasa as the names of some kings about whom no particulars are given anywhere-even as frankly admitted by them. Prof. Wilson remarks of the two princes, no particulars are given in the commentary, nor have they been met with elsewhere, the whole hymn is very elliptical and obscure." (Notes on Vol. II P. 211.)

H. H. Griffith also quoting Wilson's words says :—

"The whole hymn as Prof. Wilson observes is very elliptical and obscure, and much of it is at present unintelligible." (Hymns of the Rigveda Vol. I P. 169).

This hymn has connection with the previous hymn, as there is mention of the attributes of the King, the subjects and men in general as in that hymn. Here ends the commentary on the 122nd hymn and third Varga of the First Mandala of the Rigveda.

अथ त्रयोविंशत्युत्तरशततमं सूक्तम्

HYMN CXXIII (123)

अस्य त्रयोदशर्चस्य सूक्तस्य कक्षीवान् ऋषिः। उषा १, ३, ६, ७, ६, १०, १३ विराट् त्रिष्टुप् छन्दः। २, ४, ८ १२ निचृत् त्रिष्टुप्। ५ त्रिष्टुप्। धैवतः स्वरः। ११ भुरिक् पंक्तिश्छन्दः। पंचमः स्वरः॥

The seer of the hymn-Kakshivan. Devata or subject-Usha. Metres-Trishtup of various forms and Bhurik Pankti-Tunes-Dhaivata and Panchama.

अथ दम्पत्योर्विषयमाह

The duties of the husband and wife are told in the hymn.

Mantra—1

पृथू रथो दक्षिणाया अयोज्यैनं देवासो अमृतासो अस्थुः।
कृष्णादुदस्थादर्या३ विहायाश्चिकित्सन्ती मानुषाय क्षयाय॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

या मानुषाय चिकित्सन्ती विहाया अर्या उषाः कृष्णात् उत् अस्थात् इव विदुषा आयोजि सा च एतं पतिं युनक्ति ययोः दक्षिणायाः पृथुः रथः चरति तौ अमृतासः देवासः आ अस्थुः॥

TRANSLATION

A noble lady great on account of her virtues and healing the diseases and bringing health to human beings while living at home, queen of the house rises, above darkness (of ignorance) like the Dawn as yoked in the Chariot of the house hold life by her learned husband and she yokes him for co-operation. Her spacious chariot has been harnessed from the southern direction or rightside and great scholars who regard themselves, as immortal (owing to the immortality of their soul) and who are endowed with Divine virtues ascend it.

PURPORT

When a bride is like the Dawn and bride-groom is like the moon, their marriage brings about much happiness.

THE COMMENTATOR'S NOTES

(विहाया:) महती = Great.

(क्षयाय) गृहाय = For the home.

(चिकित्सन्ती) चिकित्सां कुर्वती

= Healing diseases and bringing health.

TRANSLATOR'S NOTES

विहाया इति महन्नाम (निघ० ३.३) = Great.

(क्षयाय) गृहाय-क्षि-निवासगत्योः अत्र निवासार्थग्र हणाद् गृहार्थः चिकित्संती = Healing diseases and bringing health. While Rishi dayananda Saraswati takes it literally and interprets it merely as चिकित्सां कुर्वती meaning thereby that a learned lady must be well-versed in the science of healing, Shri Sanacharya takes it allegorically as चिकित्सन्ती-अन्धकारनिवारणरूपां चिकित्सां कुर्वती-तमोनिवारयन्तीत्यर्थः = Dispelling darkness चिकित्सती is from कित-निवासे रोगापनयने च By the illustration of the Usha (Dawn) and moon, the marriage of the parties of suitable mild temperament is indicated as interpreted by Sayanacharya. The word दक्षिणा has been interpreted as प्रवृद्धा स्वव्यापार कुशला = Progressive and expert in her work. It is derived from दक्षा-वृद्धौ शीघ्रार्थेव (भ्वा)।

पुनस्तमेव विषयमाह ।

The same subject is continued.

Mantra – 2

पूर्वा विश्वस्माद्भुवनादबोधि जयन्ती वाजं बृहती सनुत्री ।
उच्चा व्यख्यद्युवतिः पुनर्भूरोषा अगन्प्रथमा पूर्वहूतौ ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

या पूर्वहूतौ पुनर्भूः वाजं जयन्ती बृहती सनुत्री प्रथमा

युवतिः यथा उषाः विश्वस्माद् भुवनात् पूर्वा प्रबोधि । उच्चा व्यख्यत् तथा आगन् (सा विवाहे योग्या भवति) ॥

TRANSLATION

That young woman is fit to marry who conquers or acquires all knowledge even in the household life where great experienced elderly scholars are invited and who is like the Dawn, who comes again and again giving light, who is great in virtues and distributes or diffuses knowledge. As the Dawn wakes up (so to speak) in the morning before all the world, so this educated lady like the Dawn wakes up early in the morning before all and being highly educated teaches about the great objects of the world to all students.

PURPORT

All girls should spend one fourth of their span of life in the acquisition of knowledge and after that, being highly educated every one of them should marry a suitable husband. They should be charming like the Dawn.

THE COMMENTATOR'S NOTES

(वाजम्) विज्ञानम् = Knowledge.

(पूर्वहूतौ) पूर्वेषां विद्यावृद्धानां हूतिः आह्वानं यस्मिन् गृहाश्रमे तस्मिन्

= In the household life where experienced elderiy scholars are invited.

TRANSLATOR'S NOTES

वाजम् is derived from वज-गतौ गतेस्त्रयोऽर्था ज्ञानं गमनं प्राप्तिश्च अत्र ज्ञानार्थग्रहणम् ।

पुनस्तमेव विषयमाह

The same subject is continued.

Mantra—3

यदद्य भागं विभजासि नृभ्य उषो देवि मर्त्यत्रा सुजाते ।
देवो नो अत्र सविता दमूना अनागसो वोचति सूर्याय ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

या पूर्वहूतौ पुनर्भूः वाजं जयन्ती बृहती सनुत्री प्रथमा युवतिः यथा उषाः विश्वस्माद् भुवनात् पूर्वा अबोधि। उच्चा व्यख्यत् तथा आगन् (सा विवाहे योग्या भवति)।।

TRANSLATION

O illustrious lady full of divine virtues ! thou leadest a noble life for the welfare of all leaders and others like the Dawn, dividing the time for various acts. Thy husband also shines like the bright sun among men, on account of his extra-ordinary virtues and is best of friends as a good householder. Let him make us sinless and guileless in order to acquire the knowledge of God. Let us then honour you both constantly.

PURPORT

When both husband and wife are highly educated, righteous, propagators or diffusers of knowledge and wisdom and pleased with one another, it is then they can enjoy demostic happiness in household life.

THE COMMENTATOR'S NOTES

(देवि) सुलक्षणैः सुशोभिते

= Adornedwith auspicious characteristics or virtues.

(सूर्याय) परमेश्वरविज्ञानाय

= For the knowledge of God.

(भागम्) भजनीयम्

= Noble or admirable.

[देवि] सुलक्षणैः सुशोभिते

TRANSLATOR'S NOTES

The word देवी is derived from दिवु-क्रीड़ा विजिगीषा व्यवहार द्युति स्तुति मोदमद स्वप्न कान्ति गतिपु here the meaning of द्युति and कान्ति have been particularly taken. The word सूर्याय is used here for the Divine Sun-the light of lights. सृ-गतौ He who should be known and attained by all and is all-pervading.

पुनस्तमेव विषयमाह

The same subject is continued :

Mantra—4

गृहङ्गृहमहना यात्यच्छा दिवेदिवे अधि नामा दधाना ।
सिषासन्ती द्योतना शश्वदागादग्रमग्रमिद् भजते वसूनाम् ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

या स्त्री यथा उषा अहना गृहं अच्छ अधियाति दिवे-दिवेनाम दधाना द्योतना सती वसूनाम् अग्रम् अग्रं भजते शश्वत् इत् आयात् तथा सिषासन्ती भवेत् (सा गृहकार्या-लंकारिणी स्यात्) ॥

TRANSLATION

As the Ushas (Dawn) goes daily from house to house with her light and bearing the names of the days (like Sunday, Monday etc.) comes perpetually diffusing light to the foremost part of the earth and other worlds, in the same way, the noble lady who desires to bestow benefit upon others by distributing wealth and articles to the needy, is said to be the ornament of the house.

PURPORT

As the lustre of the sun comes in front of all objects and makes them visible and is regular in appearance, so should a lady be regular in her habits and shining like the Dawn on account of her virtues.

THE COMMENTATOR'S NOTES

(सिषासन्ती) दातुमिच्छन्ती = Desiring to give.

(वसूनाम् पृथिव्यादीनाम्
= Of the earth and other worlds.

TRANSLATOR'S NOTES

सिषासन्ती is from षणु-दाने सन् therefore the meaning of दातुमिच्छन्ती or desirous of giving.

In the shatpath Brahmana 8 Vasus have been explained as follows—

कतमे वसव इति । अग्निश्च पृथिवी वायुश्चान्तरिक्षं चादित्याश्च द्यौश्च चन्द्रमाश्च नक्षत्राणि च एते वसवः एते हीदं सर्वं वासयन्ते ते यदिदं सर्वंवासयन्ते तस्माद् वसव इति ॥

Fire, earth, air, firmament, sun sky, moon and starts are eight vasus.

पुनस्तमेव विषयमाह ।

The same subject is continued.

Mantra—5

भगस्य स्वसा वरुणस्य जामिरुषः सूनृते प्रथमा जरस्व ।
पश्चा स दध्या यो अघस्य धाता जयेम तं दक्षिणया रथेन ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे सूनृते त्वम् उषः (उषाः इव) भगस्य स्वसा इव वरुणस्य जामिः इव प्रथमा सती विद्याः जरस्व यः अघस्य धाता भवेत् तं दक्षिणयारथेन यथा वयं जयेम तथा त्वं दध्याः । (यः जनः पापी स्यात्) स पश्चा (तिरस्करणीयः) ॥

TRANSLATION

O lady of truthful conduct, thou art like the Dawn, the sister of prosperity, daughter of a noble learned person, admire and give the knowledge of various sciences. As we overcome an upholder or supporter of falsehood with the well-trained army and with the vehicles like the aeroplane etc., so thou shouldst also do.. A sinner should be always dishonoured and insulted.

PURPORT

Women should augment prosperity of their homes, good conduct should be maintained and the wicked must be duly punished.

THE COMMENTATOR'S NOTES

(जामिः) कन्या = Daughter.

(दक्षिणया) सुशिक्षितया सेनया
= With well-trained army.

(दक्ष-वृद्धौ शीघ्रार्थे च) Tr.

पुनस्तमेव विषयमाह ।

The same subject is continued.

Mantra—6

उदीरतां सूनृता उत्पुरंन्धीरुद्ग्नयः शुशुचानासो अस्थुः ।

स्पार्हा वसूंनि तमसापंगूळ्हाविष्कृण्वन्त्युषसो अस्थुः ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे सत्पुरुषाः सूनृताः सन्तो यूयं यथा पुरन्धीः शुशुचानासः अग्नयः इव स्त्रियः उदीरताम् स्पार्हा वसूनि उत् अस्थुः । यथा उषसः तमसा अपगूढ़ा (द्रव्याणि) विभातीः च उत् आविष्कृण्वन्ति (तथा भवत) ॥

TRANSLATION

O Good men ! being endowed with truthfulness and other virtues, urge well upon other women also to do noble deeds like the purifying fires upholding or maintaining bodily functions and let desirable wealth of all kinds be acquired. You should be like the radiant Dawns which manifest objects hidden by the darkness and give light.

PURPORT

When women behaving like the Dawns, drive away all darkness of ignorance and impurity manifest knowledge and

purity and augment prosperity, they constantly enjoy happiness.

THE COMMENTATOR'S NOTES

(सूनृताः) सत्यभाषणादिक्रियाः

= Truthfulness and other good acts.

(पुरन्धीः) याः पुरं श्रितां क्रियां दधति ताः

= Which uphold or maintain bodily functions.

पुनस्तमेव विषयमाह ।

The same subject is continued.

Mantra—7

अपान्यदेत्यभ्य१न्यदेति विषुरूपे अहनी सं चरेते ।
परिक्षितोस्तमो अन्या गुहाकरद्यौदुषाः शोशुचता रथेन ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

ये विषुरूपे अहनी (रात्रिदिने) सह संचरेते तयोः परिक्षितोः तमः प्रकाशयोः मध्यात् गुहा तमः अन्या अकः (कृत्यानि करोति) उषाः शोशुचता रथेन । अद्यौत् । अन्यत् अभि एति इव दम्पती वर्तेताम् ॥

TRANSLATION

The one departeth and the other cometh unlike in hue, day's halves (day and night) march on successively. One (night) hides the gloom of the all-encompassing heaven and earth. The day with its bright and charming form illuminates all objects.

PURPORT

There are two things in this world, darkness and light by whieh there are day and night in the hemisphere. The object that gives up dark, takes on light. When light gives up darkness, the night takes it up. These two successively pervade all objects and exist together. Whenever there is

union of dark and light, it is called Sandhya. (Morning and evening light). When they are separate, they are called day and night. Those husbands and wives who like day and night come together for the sake of progeny and then live separately with self-restraint, give up all cause of suffering and take up all that causes happiness. Thus they always enjoy happiness.

THE COMMENTATOR'S NOTES

(विषुरूपे) व्याप्तस्वरूपे = Pervading.

(परिक्षितोः) सर्वतो निवसतोः
= Residing in all directions.

(उषाः) दिनम् = Day.

(रथेन) रम्येण स्वरूपेण = With charming form.

पुनस्तमेव विषयमाह ।

The same subject is continued :

Mantra--8

सदृशीरद्य सदृशीरिदु श्वो दीर्घं संचन्ते वरुणस्य धाम ।
अनवद्यास्त्रिशतं योजनान्वेकैका क्रतुं परि यन्ति सद्यः ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

या अद्य अनवद्या सदृशीः उ श्वः सदृशीः वरुणस्य दीर्घं धाम सचन्ते । एका एका त्रिशतं योजनानि क्रतुम् सद्यः परियन्ति (ता इत् व्यर्थं केनचित् नो नेयाः) ॥

TRANSLATION

The same today, the same tomorrow, the irreproachable and joyful (dawns) traverse in the long and distant space of the air. They also are seen at the distance of 30 Yajana or about 150 miles from the appearance of the sun. They should never be wasted by any one, but utilised for meditation etc.

PURPORT

As in this creation of God, there is never transgression of the appointed time of days and nights, the same is the case with other eternal laws. Those men who give up all laziness and act according to the laws of the Universe, acquire admirable knowledge and wealth. As days and night come and go regularly, so men should be regular, in their dealings. They should be, industrious and punctual.

THE COMMENTATOR'S NOTES

(वरुणस्य) वायोः = Of the air.

(त्रिंशतं योजनानि) विंशत्यधिकशतं क्रोशान्
= 120 Kroshas or about 150 miles.

TRANSLATOR'S NOTES

Rishi Dayananda has interpreted वरुणस्य here as वायोः though other translators have interpreted it as सूर्यस्य or of the sun. For the meaning of वरुण as वात or air, see Shatapath Brahmana वातो (व्यान:) वरुण: (शत० १२.६.१.१६) and Maitrayani Sanhita ४. ८. ५ वातोवरुण: (मैत्रायणी संहिता ४.८.५) The exact significance of the number त्रिंशतं योजनानि is still a matter of further research as it relates to the science of Astronomy. As in this and some other hymns, the duties of the wife mentioned by the illustration of the Dawn, there is the indication that the bride should marry a bridegroom living at the distance of at least 30 Yajanas or about 150 miles and that she should always maintain the same loving attitude towards her husband under all circumstances.

पुनस्तमेव विषयमाह ।

The same subject is continued.

Mantra--9

जा॒नु॒त्यह्नः॑ प्रथ॒मस्य॒ नाम॑ शु॒क्रा कृ॒ष्णाद॑जनिष्ट श्वि॒तीची॑ ।
ऋ॒तस्य॒ योषा॒ न मि॑नाति॒ धामाह॑रह॒र्निष्कृ॒तमा॒चर॑न्ती ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

(हे स्त्रि) यथा प्रथमस्य अह्नः नाम जानती शुक्रा शिवतीची उषाः कृष्णात् अजनिष्ट । ऋतस्य योषा इव अहरहः आचरन्ती सती निष्कृतं धाम न मिनाति (तथा त्वं भव) ॥

TRANSLATION

O woman! Thou shouldst be like the Dawn who denotes the advent of the vast day though she is born out of the gloom but is herself white-shining and purifier. Like the life of an honest and truthful person, she impairs not the sun's splendour but takes her God-ordained place and work.

PURPORT

As the Dawn is born out of darkness, but accomplishes or manifests the day and is never antagonistic to the day, in the same way, a woman by truthful conduct should bring good name to the family of her parents and should not do anything contrary to the noble wishes of her husband and father-in-law.

THE COMMENTATOR'S NOTES

(जानती) ज्ञापयन्ती = Denoting.

(शुक्रा) शुद्धिकरी = Purifier.

(निष्कृतम्) निष्पन्नं निश्चितं वा

= Fixed or accomplished.

TRANSLATOR'S NOTES

Even Sayanacharya has explained जानती here as प्रज्ञापयन्ती शुक्रा is derived from-शुचिर्-पूतीभावे hence the meaning of शुद्धिकरी Sayanacharya interprets ऋतस्य as सत्यभूतस्य आदित्यस्य धाम-तेजोयुक्तम् स्थानं योषा-मिश्रयन्ती while Rishi Dayananda interprets योषा as भार्या which is its well-known popular meaning.

पुनस्तमेव विषयमाह ।

The same subject is continued :

Mantra—10

कृन्येव तुन्वा३ शाशंदाना एषि देवि देवमियंक्षमाणम् ।
संस्मयंमाना युवतिः पुरस्तादाविर्वक्षांसि कृणुषे विभाती ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे देवि ! या त्वं तन्वा कन्या इव शाशदाना इयक्षमाणं देवं (पतिम्) एषि पुरस्तात् विभाती युवतिः संस्मयमाना वक्षांसि आविष्कृणुषे सा उषरुपमा जायसे ॥

TRANSLATION

O noble loving lady ! Thou manifestest in person like an active maiden and approachest thy loving housband. Thou being a youthful bride (of about 24 years) meetest thy husband smiling and uncovering thy bosom in his presence desiring union with him intensely, shining well with thy virtues.

PURPORT

As a learned Brahmacharini after the completion of her education, gets a suitable loving husband and enjoys happiness, so should others also do

THE COMMENTATOR'S NOTES

(शाशदाना) व्यवहारेऽवति तीक्ष्णतामाचरन्ती
= Active in her works.

(इयक्षमाणम्) अतिशयेन संगच्छमानम्
= Meeting lovingly.

TRANSLATOR'S NOTES

शाशदान इति पदनाम (निघ० ४.३)

पद-गतौ अत्र गमनार्थग्रहणम्

इयक्षमाणम् is derived from **यज-पूजासंगतिकरणदानेषु अत्र संगतिकरणार्थग्रहणम् ।**

पुनस्तमेव विषयमाह
The same subject is continued.

Mantra--11

सुसङ्काशा मातृमृष्टेव योषाविस्तन्वं कृणुषे दृशे कम् ।
भद्रा त्वमुषो वितरं व्युच्छ न तत्ते अन्या उषसो नशन्त ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे कन्ये ! सुसंकाशा योषा मातृमृष्टा इव या दृशे तन्वम् आविष्कृणुषे भद्रा सती कं पतिं प्राप्नोषि सा त्वं वितरं सुखं व्युच्छ । हे उषः यथा अन्याः उषसः न नशन्त तथा ते तत् सुखं मा नश्यतु ॥

TRANSLATION

O Dawn-like girl, radiant as a bride well-trained with good education and purified by her learned mother, thou displayest thy person to the view of thy husband when thou most auspicious, gettest a bridegroom who is giver of joy to thee. Be source of happiness to thy husband who gives thee delight. May not joy ever decay, as the Dawns do not fade away but come regularly.

PURPORT

As the Dawns have their movement in appointed time and place (as ordained by the Lord), so should wives approach their husbands in proper season and time, (as ordained by the Shastras).

THE COMMENTATOR'S NOTES

(सुसंकाशा) सुष्ठु शिक्षया सम्यक् शासिता

= Well-trained by giving good education.

(मातृमृष्टा इव) विदुष्या मात्रा सत्यशिक्षा प्रदानेन शोधिता इव

= Purified by her learned mother by imparting true education.

(वितरम्) सुखदातारम् = Giver of happiness.

(उषः) उषर्वद् वर्तमाने = Acting like the Dawn.

पुनस्तमेव विषयमाह ।

The same subject is continued :

Mantra—12

अश्वा॑वतीर्गोम॑तीर्वि॒श्ववा॑रा॒ यत॑माना र॒श्मिभि॒: सूर्य॑स्य ।
परा॑ च॒ यन्ति॒ पुन॒रा च॑ यन्ति भ॒द्रा नाम॒ वह॑माना उ॒षास॑: ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

(हे स्त्रि) सूर्यस्य रश्मिभिः सह उत्पन्नाः यतमानाः अश्वावतीः गोमतीः विश्ववाराः भद्रानाम वहमानाः उषसः परा च यन्ति पुनः आयन्ति च तथा यूयं वर्तध्वम् ॥

TRANSLATION

O women, you should behave like the dawns, which possessed of pervasiveness possessed of the earth and the rays of the Sun, existing through all time, vying with the rays of the sun (in dissipating darkness), sending down benefits to mankind, O Auspicious Usha, go away and again return.

PURPORT

As the Dawns, have fixed time and activities, under the approximity of the sun, in the same manner, married men and women should love one another.

THE COMMENTATOR'S NOTES

(अश्वावतीः) प्रशस्ता अश्वाः-व्याप्तयो अद्यन्ते यासां ताः ॥

= Possessed of pervasiveness.

(गोमतीः) बहु पृथिवी किरणयुक्ताः

= Possessed of much earth and the rays of the sun.

पुनस्तमेव विषयमाह ।

The same subject is continuld.

Mantra—13

ऋतस्यं रश्मिमंनुयच्छंमानां भद्रम्भंद्रं क्रतुमस्मासुं धेहि ।

उषों नो अद्य सुहवा व्युंच्छास्मासु रायों मघवंत्सु च स्युः ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

(१) हे उषर्वत् पत्नि ! त्वम् अद्य तस्य रश्मिम् उषाः इव हृद्यं पतिम् अनुयच्छमाना अस्मासु भद्रं भद्रं क्रतुम् धेहि। सुहवा सती नः (अस्मासु) व्युच्छ यतः मघवत्सु अस्मासु रायः च स्युः ॥

TRANSLATION

O wife behaving like the Dawn that follows the rays of the sun, follow the path of the Veda and thy beloved husband. Bestow upon us every auspicious or good knowledge and co-operate in every noble act. Being the giver of good happiness, dispel all darkness of ignorance, so that spiritual wealth may devolve upon us who possess material riches.

PURPORT

As Chaste women, always augment good intellect, Dharma (righteousness) and prosperity by serving well their husbands and other relatives, in the same manner, other women should also do.

THE COMMENTATOR'S NOTES

(अनुयच्छमाना) अनुकूलतया प्राप्ता

= Following or getting on suitably with proper accord or harmony.

(सुहवा) सुष्ठु सुखप्रदा = Giver of good happiness.

TRANSLATOR'S NOTES

उच्छ-विवासने अन्धकारं निवारय=Dispel darkness. सुहवा in derived from सु+हु-दानादनयोः आदाने च Here the first meaning of दान or giving has been taken.

ऋतम् इति सत्यनाम (निघ० ३.१०)

= Truth. The word is also used for the Veda, containing absolutely true knowledge.

ब्रह्म वा ऋतम् (शत०४. १. ४. १०) ब्रह्म वै मन्त्रः मंत्रायणी संहिता ३. १. १ जैमिनीयोपनिषद् ब्राह्मणे १.८८ शत० ७. १. १. ५ वेदो ब्रह्म (जैमिनीयोप० ४.११, ४. ३)

The word ऋतम् means truth, therefore here it has also been taken in the sense of an absolutely truthful husband besides the Veda containing absolutely true knowledge.

In this hymn, the attributes or qualities of a good woman have been mentioned by the illustration of the Dawn, hence it is connected with the previous hymn.

Here ends the commentary on the 123rd hymn and sixth Varga of the first Mandala of the Rigveda Samhita.

अथ चतुर्विंशत्युत्तरशततमं सूक्तम्
HYMN - CXXIV (124)

अस्य त्रयोदर्शचस्य सूक्तस्य दीर्घतमसः कक्षीवान् ऋषिः । उषा देवता। १, ३, ६, ६, १० निचृत् त्रिष्टुप् छन्दः । ४, ७, ११ त्रिष्टुप् । १२ विराट् त्रिष्टुप् छन्दः । धैवतः स्वरः । २, १३ भुरिक् पंक्तिः । ५ पंक्तिः ८ विराट् पंक्तिश्छन्दः ।।

Seer - Kaksheevan. Devata or subject-Usha. Metres-Trishtup and Pankti of various forms.

अथ सूर्यलोकविषयमाह ।

The attributes of the solar world are taught in the first Mantra.

Mantra--1

उषा उच्छन्ती समिधाने अग्ना उद्यन्त्सूर्य उर्विया ज्योतिरश्रेत् ।
देवो नो अत्र सविता न्वर्थं प्रासावीद् द्विपत्प्र चतुष्पदित्यै ।।

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे मनुष्याः! यः सुदर्शतरः अस्य दिवातरात् अप्रायुषे नक्तं सर्वान् दर्शयति इव तं पृक्षम् दिवातरात् उपरासु वयं धीमहि आत् अस्य ग्रभणवत् वीळु भक्तम् अभक्तम् अवः आयुः सूनवे न शर्म वि अन्तः अजराः अग्नयः इव व्यन्तः अजराः वयं धीमहि॥

TRANSLATION

O men, we bear in us the virtues of that King who is worth-seeing or Charming like the full moon and the sun that illumines the world. He gives shelter to all as the father gives dwelling and happines to his son. His test is at the night of the difficulies than in the day of happiness. He establishes proper relations with all and unifies them and therefore we admire and listen to his message in all directions. Being like lightning, and free from decay and desiring the welfare of all, let us protect good devout persons and punish unrighteous persons not devoted to God. Let us have long life.

PURPORT

Good men should nourish and preserve the subjects as moon preseves the plants and the herbs. As parents always satisfy and please their children, so we should satisfy and please all by our good conduct.

THE COMMENTATOR'S NOTES

(पृक्षम्) सम्पृक्तारम्

= Establisher of good relations or unifier.

(उपरासु) दिक्षु उपरा इति दिङ्नाम (निघ० १. ६)

= In all directions.

(व्यन्तः) कामयमानाः = Desiring the welfare of all.

TRANSLATOR'S NOTES

पृक्षी–सम्पर्के वी – गतिव्याप्तिप्रजनकान्त्यसनखादनेषु अत्र कान्त्यर्थग्रहणम्, कान्तिश्च कामना । अथ राजादयः किं कुर्युरित्याह ।

What should kings and others officers of the State do is told in the sixth Mantra.

Mantra—6

स हि शर्धो न मारुतं तुविष्वणिरप्नस्वतीषूर्वरास्विष्टनि-
रार्तनास्विष्टनिः । आदद्धव्यान्याददिर्यज्ञस्य केतुरर्हणा ।
अध स्मास्य हर्षतो हृषीवतो विश्वे जुषन्त पन्थां नरः
शुभे न पन्थाम् ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे विश्वेनरः यूयं हृषीवतः हर्षतः अस्य यज्ञस्य शुभे न पन्थां जुषन्त अध यं केतुः आददिः अर्हणा हव्यानि आदत् मारुतं शर्धः न अप्नस्वतीषु उर्वरासु आर्तनासुतुविष्वणिः इष्टनिः अस्ति स स्म इष्टनिः हि न्यायपन्थां प्राप्तुम् अर्हति ॥

TRANSLATION

O men, you should follow for the attainment of joy, the path of the Yajna (noble act) that is joyful and giver of delight. That man alone can tread upon the path of justice and prompt others to do so who is learned accepter of good things and virtues, eater of nourishing and good edibles offered with honour. He is deserving of veneration and mighty like the winds. He gives noble teachings to the women

who are of fair form, and whose conduct is truthful and who have good progeny. He is respectable as he is a good teacher. All men should follow him as they follow a path that leads to happiness.

PURPORT

It is only those persons who make the best use of the wealth and articles earned righteously and propagate among the people Dharma (righteousness) and Vidya (knowledge) that can prompt others to follow the path of Dharma.

THE COMMENTATOR'S NOTES

(तुविस्वनिः) तुविर्वृद्धा स्वनिः—उपदेशो यस्य सः
= Giver of good sermons or teachings.

(अप्नस्वतीषु) प्रशस्तम् अप्नः अपत्यं विद्यते यासां तासु ।
= Among women who have good progeny.

(उर्वरासु) सुन्दरवर्णयुक्तासु = Endowed with fair form.

(आर्तनासु) याः आर्तयन्ति सत्ययन्ति
= In those who are of truthful conduct.

TRANSLATOR'S NOTES

(अप्न इत्यपत्यनाम (निघ० २. २)

स्वन-शब्दे भ्वा० प०

अथाध्यापकाध्येतारः कथं वर्तेरन्नित्याह

How should the teachers and the taught behave is taught in the seventh Mantra.

Mantra—7

द्विता यदीं कीस्तासो अभिद्यवो नमस्यन्त उपवोचन्त भृगवो मथ्नन्तो दाशा भृगवः। अग्निरीशे वसूनां शुचिर्यो धर्णिरेषाम् । प्रियां अपिधीर्वनिषीष्ट मेधिर आ वनिषीष्ट मेधिरः ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे मनुष्याः ! यत् कीस्तासः अभिद्यवः नमस्यन्तः भृगवः ज्ञानं मथ्नन्तः भृगवः च दाशाः (विद्यादानाय) विद्यार्थिने द्विता ईम् उपवोचन्त यथा एषां वसूनां मध्ये यः धर्णिः शुचिः अग्निः अस्ति यथा मेधिरः प्रियान् अपिधीन् वनिषीष्ट यथा मेधिरः दातॄन् आवनिषीष्ट विद्याम् ईशे तथा एव तान् सेवध्वम् ॥

TRANSLATION

O men, exceedingly wise and glorious persons, bowing before God and serving Dharma, who are in the habit of dispelling darkness of ignorance and un-righteousness, all-eviators of misery and of reflective nature, Impart knowedge to the pupils in two forms for their benefit, by teaching and setting practical example. As there is this electricity among the worlds pure and purifier, upholder of various objects,as a wiseman asks the bearers of virtues and destroyers of miseries to help in the advancement of noble undertaking and being himself as unifier and master of knowledge, urges upon liberal persons to donate for philanthropic activities, so you should utilise the electric power and serve wise and highly iearned people.

PURPORT

It is the duty of the students to request great scholars to impart them knowledge and it is the duty of great scholars always to do so gladly. There is nothing nobler than this act of giving and diffusing true knowledge.

THE COMMENTATOR'S NOTES

(कीस्तासः) मेधाविनः कीस्तास इति मेधाविनाम (निघ० ३. १५)

= Exdeedingly wise persons or geniuses.

(१) (भृगवः) अविद्याऽधर्मनाशनशीलाः

= Wise hermits who are in the habit of dissolving ignorance and un-righteousness.

(२) (भृगवः) दुःखभर्जकाः = Destroyers of misery.

अथ कथं राजप्रजाजनोन्नतिः स्यादित्याह

How can there be the Progress or advancement of the interest of the rulers and their subjects is taught in the eighth Mantra.

Mantra—8

विश्वासां त्वा विशां पतिं हवामहे सर्वासां समानं दम्पतिं भुजे सत्यगिर्वाहसं भुजे । अतिथिं मानुषाणां पितुर्न यस्यासया । अमी च विश्वे अमृतास आ वयो हव्या देवेष्वा वयः ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे मनुष्य ! यथा वयं भुजे विश्वासां विशां सर्वासां प्रजानां पतिं त्वा हवामहे । यथा च अमी देवेषु आवयः हव्या गृहीतवन्तः आवयः विश्वे अमृतासः सन्तः वयं यस्य आसया पितुः न भुजे मानुषाणां समानम् अतिथिं सत्यगिर्वहसं त्वां पतिं हवामहे तथा दम्पतिं भजामः ॥

TRANSLATION

O King, am we invite you who are the protector of all people, of all good actions, the same alike to all impartial, for the enjoyment of the bliss of knowledge like good food in our bodies. We who have received knowledge living among the en-lightened truthful persons and thus realising the immortality of souls, invoke you who are venerable like a guest and desiring and acquiring wisdom and conveyor of true words and we also show respect to all good couples.

PURPORT

There can not be any progress or advancement of the rulers and their subjecte, unless and until there are absolutely

truthful impartial persons incharge of the administration of a State.

THE COMMENTATOR'S NOTES

(भुजे) विद्यानन्द भोगाय

= For the enjoyment of the bliss of knowledge.

(वयः) १ विद्यां कामयमानाः = Desiring knowledge.

(वयः) २ प्राप्तविद्याः

= Those who have received knowledge.

(वी-गतिव्याप्तिकान्त्यसनखादनेषु)

अत्र प्राप्तिकान्त्यर्थग्रहणम्

पुनः राजादयो जनाः कीदृशा जायन्त इत्याह ।

How should the rulers be is told in the ninth Marntra.

Mantra – 9

त्वम॑ग्ने सह॑सा सह॑न्तमः शुष्मिन्त॑मो जायसे दे॒वता॑तये र॒यिर्न दे॒वता॑तये र॒यिर्न शुष्मिन्त॑मो हि ते॒ मदो॑ द्यु॒म्निन्त॑म उ॒त क्रतु॑ः । अध॑ स्मा ते॒ परि॑ चरन्त्यजर श्रुष्टीवा॑नो॒ नाज॑र ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृत)

हे अजर न (इव) अजर अग्ने (विद्वन्) देवतातये रयिः न (इव) देवतातये सहन्तमः शुष्मिन्तमः त्वं सहसा जायसे यस्य ते (तव) शुष्मिन्तमः द्युम्निन्तमः मदः उत (अपि) क्रतुः हि विद्यते । अध ते तव श्रुष्टीवानः स्म परि-चरन्ति (तं त्वां सर्वे वयम् आश्रयेम) ॥

TRANSLATION

O great scholar free from decay and devoted to eternal God ! Thou art like beauty or wealth to a learned person, for honouring enlightened persons thou the destroyer of

enemies by the strength, the possessor of great splendour, verily thy exhilaration is most brilliant and full of force; thy intellect or action is most productive of renown. Thy active followers, attendants serve thee well. We also take shelter in thee.

PURPORT

Those persons are givers of joy and happiness, who possess physical and spiritual power, are intelligent and who have wealthy or prosperous subjects.

THE COMMENTATOR'S NOTES

(द्युम्निन्तमः) बहूनि द्युम्नानि धनानि विद्यन्ते यस्य स द्युम्नी अतिशयेन द्युम्नीति द्युम्निन्तमः । अत्र सर्वत्र नाद् घस्येति नुट्

= Possessing much wealth.

(श्रुष्टीवानः) शीघ्रक्रियायुक्ताः = Active, quick-acting.

(अजर) १ जराबोधरहित = Free from decay.

(अजर) २ यः अजे जन्मरहिते ईश्वरे रमते तत्सम्बुद्धौ । अत्र वाच्छन्दसीत्यविहितो डः ।।

= Devoted to God who is Eternal or free from birth and death.

पुनरखिलैर्मनुष्यैः किं कर्त्तव्यमित्याह

What should all men is told in the tenth Mantra.

Mantra—10

प्र वो॑ म॒हे सह॑सा॒ सह॑स्वत उ॒षर्बु॑धे पशु॒षे नाग्नये॒ स्तोमो॑ बभूत्व॒ग्नये॑ । प्रति॒ यदीं॑ ह॒विष्मा॒न्विश्वा॑सु॒ क्षासु॒ जोगु॑वे । अग्रे॑ रे॒भो न ज॑रत ऋषू॒णां जू॒र्णिर्होत॒ ऋषू॒णाम् ।

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे मनुष्याः ! वः सहस्वतः उषर्बुध पशुषे महे जोगुवे अग्नये न अग्नये विश्वासु क्षासु हविष्मान् स्तोमः सहसा

प्रबभूतु रेभः न अग्रे ऋषूणां विद्याईम् प्रति जरते यत् (यः) होताजूर्णिः भवेत् स ऋषूणां सामीप्यं गत्वा अरोगी भवेत् ॥

TRANSLATION

O men, may your praise with all good dealings be for a leader, who shines like the lightning, is great, mighty with his strength to overcome the strong, who is in the habit of getting up at the dawn, who is punisher of the wicked, who is a good preacher to all the people on the face of the earth, he admires the knowledge of the learned or the enquirers after truth like a propagandist. A man who is diseased on account of taking unsuitable food, becomes healthy and free from diseases by associating himself with highly learned persons well versed in Vaidyaka (Medical Science).

PURPORT

Men should always endeavour to acquire good knowledge, as learned persons do.

THE COMMENTATOR'S NOTES

(क्षासु) भूमिषु क्षेति पृथिवीनाम (निघ० १.१)

= On all parts of the earth.

(रेभः) उपदेशकः = Preacher.

(ऋषूणाम्) १ प्राप्तविद्यानां जिज्ञासूनां वा

२ प्राप्तवैद्यकविज्ञानाम्

= Learned or seekers af knowledge.

TRANSLATOR'S NOTES

(रेभः) रेभृ-शब्दे भ्वा० आ०

(ऋषूणाम्) ऋषी-गतौ तुदा० गतेस्त्रयोऽर्था ज्ञानं गमनं प्राप्तिश्च अत्र ज्ञानार्थ-ग्रहणम् । ऋषूणां ज्ञानवतामिति सायणाचार्योऽपि जॄष्-वयोहानौजॄ

पुनः विद्यार्थिभिः किं कर्तव्यमित्याह

What should students do is told in the eleventh Mantra.

Mantra—11

स नो नेदिष्ठं ददृशान आ भराग्ने देवेभिः सचनाः सचेतुना महो रायः सुचेतुना महि शविष्ठ नस्कृधि सञ्चक्षे भुजे अस्यै । महि स्तोतृभ्यो मघवन्त्सुवीर्यं मथीरुग्रो न शवसा ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे मघवन् शविष्ठ अग्ने स ददृशानः त्वं तु सुचेतुना देवेभिः च सह नः महः सचनारायः आभर अस्यै प्रजायै संचक्षे भुजे शवसा उग्रः न मथीः त्वं नेदिष्ठं, महि सुवीर्यम् आभर अनेन सुचेतुना महि स्तोतृभ्यः नः (अस्मान्) विद्यावतः कृधि ॥

TRANSLATION

O learned person shining like the fire, possessing admirable wealth (of wisdom etc.) and most mighty, being seen and close by us along with a highly educated person and a good teacher, bestow upon us abundant desirable riches with benign intent. Render us illustrious and virile, so that we may behold and enjoy this earth and grant greatness with excellent progeny to us who praise thee and make us full of knowledge and wisdom. Thou art destroyer of foes like a fierce giant in strength.

PURPORT

The students should try to get thorough knowledge of all sciences by requesting and serving absolutely truthful and learned persons, so that the rulers and their subjects observe Dharma or righteousness in their dealings, being full of knowledge and wisdom.

THE COMMENTATOR'S NOTES

(सुचेतुना) १ सुष्ठु विज्ञात्रा

= By a scholar knowing well.

२ सुष्ठु चेतयित्रा = By a good teacher.

(सचनाः) समवेतुं योग्याः

= Desirable or worthy of acquisition.

(चिती-संज्ञाने षच-समवाये) Tr.

This hymn is connected with the previous hymn as there is the mention of duties of the learned persons and the rulers.

Here ends the commentary on the 127th hymn and thirteenth Varga of the Rigveda Samhita

अथाष्टविंशत्युत्तरशततमं सूक्तम्
HYMN CXXVIII (128)

अस्याष्टर्चस्य सूक्तस्य परुच्छेप ऋषिः । अग्निर्देवता । १ निचृदष्टिश्छन्दः ३, ४, ६, ८ विराडत्यष्टिश्छन्दः । गान्धारः स्वरः । २ भुरिगष्टिः । ५, ७, निचृदष्टिश्छन्दः । मध्यमः स्वरः ॥

The seer of the hymn-Parucchepa Devata or subject Agni, metre-Ashti of various forms. Tunes-Gandharva and Madhyama.

पुनर्विद्यार्थिनः कीदृशा भवेयुरित्याह ।

How should students be is told in the first Mantra of the hymn.

Mantra—1

अयं जायत मनुषो धरीमणि होता यजिष्ठ उशिजामनु व्रतमग्निः स्वमनुः व्रतम् । विश्वश्रुष्टिः सखीयुते रयिरिव श्रवस्युते । अदब्धो होता नि षददिळस्पदे परिवीत इळस्पदे ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

यः अयम् इळस्पदे इळस्पदे अदब्धः होता परिवीतः सन् निषद् रयिः इव विश्वश्रुष्टिः सन् श्रवस्यते अग्निः इव उशिजाम् अनुव्रतं स्वं प्राप्तः धरीमणि होता यजिष्ठः सन् जायत स मनुष्यैः सर्वैः सह सखीयते (पूज्यः च स्यात्) ॥

TRANSLATION

That learned man behaves like a friend with all and becomes respectable everywhere, who remains indomitable giver of delight in the knowledge of the most praiseworthy God and admirable Dharma (righteousness and duty) and full of wisdom, very active, acting like the conduct of those who are desirous of knowledge and shining like the fire.

He is generous donor in a dealing that causes joy and happiness to all. He is unifier of all and accepter with gladness of the present, given to him with love and reverence.

PURPORT

That man becomes a jewel among men who follows the persons that are always eager to acquire knowledge, is full of faith in righteous acts, friend of all and giver of good qualities.

THE COMMENTATOR'S NOTES

(धरीमणि) धरन्ति सुखानि यस्मिन् तस्मिन् व्यवहारे ।
= In a dealing that cause joy.

(उशिजाम्) कामयमानानां जनानाम्
= Of the men who desire to acquire knowledge and happiness.

(विश्वश्रुष्टिः) विश्वाश्रुष्टयः-त्वरिता गतयो यस्य सः ।
अत्र श्रु धातोर्बाहुलकादौणादिकः क्तिन् प्रत्ययः ।
= Very active, quick moving.

(इळः) १ स्तोतुमर्हस्य जगदीश्वरस्य ।
= Of God who is most praise-worthy.

(इळः) २ प्रशंसितस्य धर्मस्य
= Of admirable Dharma.

(परिवीतः) परितः सर्वतः वीतं प्राप्तं विज्ञानं येन सः
= He who has acquired wisdom or knowledge from all sides.

पुनर्विद्वान् किं करोतीत्याह ।

What does a learned man do is told further in the second Mantra.

Mantra—2

तं यज्ञसाधुमपि वातयामस्यृतस्य पथा नमसा हविष्मता
देवताता हविष्मता । स न ऊर्जामुपाभृत्यया कृपा न जूर्यति ।
यं मातरिश्वा मनवे परावतो देवं भाः परावतः ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृत:)

यथा यं देवं परावतः भाः इव मनवे मातरिश्वा परावतः (देशात्) दधाति सः अया कृपा न ऊर्जाम् उपाभृतिन जूर्यति यथा च स देवताता हविष्मता ऋतस्य पथा गच्छति तथा हविष्मता नमसा तं यज्ञसाधम् अपि वयं वातयामसि ।।

TRANSLATION

As the fire which is the means of perfoming Yajna is kindled with the help of the distant wind, in the same way, we impel or propitiate a learned person who is shining like the fire, is the performer of the Yajnas (non-violent noble acts) is generous giver, is follower of the Path of Truth for the development of divine virtues, with reverential salutations followed by donations and gifts, who gladly accepts, what is given to him with love. He is always engaged in doing good to men.

PURPORT

It is the duty of a learned man to be the source of happiness to all, as the air is to all living beings by upholding all embodied articles. The learned man should give joy to all by bearing abundantly Vidya (wisdom and knowledge) along with Dharma or righteousness.

THE COMMENTATOR'S NOTES

(कृपा) कल्पनया = By his strength.

(मनवे) मनुष्याय = For the thoughtful person.

(देवम्) दातारम् = Giver of happiness.

TRANSLATOR'S NOTES

कृपा is from कृपू-सामर्थ्ये ।

मनवे is from मन-ज्ञाने

ये विद्वांसस्ते मनवः ।। (शतपथ० ८. ६. ३. ११)

It is therefore wrong on the part of Sayanacharya, Prof. Wilson, Griffith and others to take Manu as the name of a particular king instead of taking it for a learned person as Rishi Dayananda has done on the basis of the root meaning and the passage from Shatpath Brahmana 8. 6. 3. 11 that has been quoted above.

पुनस्तमेव विषयमाह

The same subject is continued.

Mantra—3

एवेन सद्यः पर्येति पार्थिवं मुहुर्गी रेतो वृषभःकनिक्रदद्-
धद्रेतः कनिक्रदत्। शतं चक्षाणो अक्षभिर्देवो वनेषु तुर्वणिः
सदो दधान उपरेषु सानुष्वग्निः परेषु सानुषु ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे विद्वन् ! त्वं यथा मुहुःगीः रेतः कनिक्रदत् इव रेतः कनिक्रदत् दधद् वृषभः वनेषु तुर्वणिः देवः उपरेषु सानुषु परेषु सानुषु च सदः दधानः अग्निः एवेन पार्थिवं सद्यः परि एति तथा अक्षभिः शतं चक्षाणः भव ॥

TRANSLATION

As Agni in the form of lightning is loud-sounding, vigorous and much loud-sounding and it pierces by its force the cloud to rain down and Agni in the form of the bright sun also through its rays dispels darkness and cloud, present in the clouds and the tops of the hill pervades the earthly objects, in the same manner, thou shouldst diffuse knowledge among the people with the help of thy senses and by all thy movements.

PURPORT

As the sun and the air uphold all and gladden the world by making the cloud rain down water, in the same manner,

learned persons should make all people happy by raining sermons in their souls i. e. by enlightening them well.

THE COMMENTATOR'S NOTES

(रेत:) जलम् = Water.

(रेत:) २ वीर्यम् = Semen.

(वनेषु) रश्मिषु = In the rays.

(तुर्वणि:) तम: शीतं हिंसन्

= Dispelling darkness and cold.

TRANSLATOR'S NOTES

वनमिति रश्मिनाम (निघ० १.५)

रेत इत्युदक नाम (मिघ० १.१२)

वन-हिंसायाम्

पुन: के विद्वांसोऽर्चनीया भवन्तीत्याह

What kind of learned persons are worthy of respect is told in the fourth Mantra.

Mantra—4

स सुक्रतुः पुरोहितो दमेदमेऽग्निर्यज्ञस्याध्वरस्य चेतति क्रत्वा

यज्ञस्य चेतति । क्रत्वा वेधाइषूयते विश्वा जातानि पस्पशे ।

यतो घृतश्रीरतिथिरजायत वह्निर्वेधा अजायत ॥

सन्धिच्छेदसहितोऽन्वय: (ऋषिकृत:)

हे मनुष्या: य: सुक्रतुः पुरोहित: अग्नि: इव दमे क्रत्वा यज्ञस्य चेतति इव अध्वरस्यचेतति क्रत्वा वेधा इषूयते विश्वाजातानि पस्पशे यत: घृतश्री: अतिथि: अजायत वह्नि: इव वेधा: अजायत (स एव सर्वै: विद्योपदेशाय समाश्रयितव्य:) ॥

TRANSLATION

O men ! that person alone should be approached for teaching of various sciences, who is endowed with good

knowledge and the power of action, who shines like the fire in every home and imparts knowledge of the honour to be shown to learned persons & inviolable and non-violent Yajna (sacrifice) by his wisdom. A man becomes highly intelligent or genius by his good knowledge and the power of doing noble deeds. He removes all ignorance like the arrow and arranges all objects in proper order. Under his instructions, a guests is supplied with Ghee (Clarified) butter and other articles. That highly intelligent or wise person becomes like the fire, dispeller of all darkness of ignorance and illuminator of knowledge.

PURPORT

Those learned persons who preach truth in every home, village, city, country and island deserve honour and worship.

THE COMMENTATOR'S NOTES

(अग्निः) पावक इव वर्तमान = Like the fire

(अध्वरस्य) हिंसितुमनर्हस्य

= Inviolable and non-violent.

(मेधाः) मेधावी = Genius.

(पस्पशे) प्रबध्नाति = Arranges.

TRANSLATOR'S NOTES

वेधा इति मेधाविनाम (निघ० ३.१५)

स्पश-बाधनस्पर्शनयोः भ्वा०

This Mantra even with the faulty translation of Sayanacharya, Prof. Wilson, Griffith and others makes it clear without the least shadow of a doubt that the word **Agni** is used in the Vedas, not only for fire but for a learned leader besides God the Supreme Leader.

अग्निः पुरोहितवद् यागनिर्वाहकः सन् दमे दमे तत् तद् यजमान गृहे सर्वेषु देवयजनेषु वा अध्वरस्य नाशरहितस्य

फलप्रदस्य यज्ञस्य तदर्थं चेतति जानाति प्रबुध्यत इत्यर्थः (सायणाचार्यः) ॥

"That Agni, who the performer of Holy acts, the priest of the family, every dwelling of the imperishable sacrifice; he thinks of the sacrifice i. e. (Wilson)

"That Agni, wise High Priest, in every house takes thought for sacrifice and holy service, yea, takes thought with mental power, for sacrifice."

(Griffith in the Hymns of the Rigveda.)

The epthets used for Agni पुरोहितः सुक्रतुः, वेधाः etc. justify Rishi Dayananda Sarasvati's interpretation of Agni as पावक इव वर्तमानो विद्वान् = a learned person acting or shining like the fire. The passages from the Brahmanas and other Vedic Literature like "अग्निर्वै दीक्षितः" (काठक सं० २३. ६, २४.६) अग्निर्वै ब्राह्मणः (काठकसंहिता ६.६) काण्व संकलने ८६ अग्निर्वै ब्रह्मा (षड्विंशब्राह्मणे १.१) un-equivoeally corroborate Rishi Dayananda Sarasvati's interpretation of Agni as a Brahmana leader.

केऽत्र कल्याणविधायका भवन्तीत्याह

Who are the benefactors of humanity is told in the fifth Mantra.

Mantra—5

क्रत्वा यद॑स्य॒ तवि॑षीषु पृ॒ञ्चते॒ऽग्नेरवे॑ण म॒रुतां॒ न भो॒ज्ये॑षि॒राय॒ न भो॒ज्या॑। स हि ष्मा॒ दान॒मिन्व॑ति॒ वसू॑नां॒ च म॒ज्मना॑। स न॑स्त्रासते दुरि॒ताद॑भि॒ह्रुतः॒ शंसा॑द॒घाद॑भि॒ह्रुतः॑ ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

यत् अस्य क्रत्वा अवेन महताम् अग्नेः इषिराय भोज्या न (इव) भोज्या न तविषीषु पृञ्चते यः हि मज्मना वसूनां च दानम् इन्वति यः नः अभिह्रुतः दुरितात् अभिह्रुतः अघात् त्रासते शंसात् संयोजयति स स्म (सुखं प्राप्नोति स च

सुखकारी जायते) स स्म विद्वान् पूज्यः स सर्वाभिरक्षको भवति ॥

TRANSLATION

That man enjoys happiness and gives delight to others. who supplies all necessary articles and edibles to a learned person well-versed in the science of the fire and the winds, with the intellect and protection of the commander of the Army and his brave soldiers. He gets the gifts from the Vasus-persons who observe Brahamcharya upto the age of at least 24 years, on account of his own strength and other virtues. He preserves us from crooked sin, wickedness and overpowering male volence that cause misery and unites us with admirable qualities. Such a man becomes a protector on all sides and is respected and revered everywhere.

PURPORT

Those learned and absolutely truthful persons are real benefactors of humanity, who prevent men from evil tendencies, habits and conduct and prompt them to acquire noble virtues.

THE COMMENTATOR'S NOTES

(अग्नेः) विद्युतः
= Of Lightning or electricity.

(मरुताम्) वायूनाम् = Of the winds.

(अभिह्रुतः) आभिमुख्यं प्राप्तात् कुटिलात्
= From the crooked. ह्वृ कौटिल्ये

पुनर्विद्वांसः किं कुर्युरित्याह

What should learned persons do is told again in the sixth Mantra.

Mantra—6

विश्वो विहाया अरतिर्वसुर्दधे हस्ते दक्षिणे तरणिर्न शिश्रथच्छ्रवस्यया न शिश्रथत। विश्वस्मा इदिषुध्यते देवत्रा हव्यमोहिषे। विश्वस्मा इत्सुकृते वारमृण्वत्यग्निर्द्वारा व्यृण्वति ॥

सन्धिच्छेदसहितोऽन्वय: (ऋषिकृत:)

विश्व: विहाया: अरति: तरणि: वसु: श्रवस्यया अग्नि: न शिश्रयत् इव न शिश्रयत् दक्षिणे हस्ते (आमलक इव) देवत्रा (विद्या) दधे विश्वस्मै इषुध्यते त्वं हवम् ओहिषे तथा इत् य: विश्वस्मै सुकृते द्वारा ऋण्वति स सुखम् इद्वारं वृण्वति ॥

TRANSLATION

A great Acharya (Preceptor) who is well-versed in all branches of knowledge and has many pupils under him, the source of happiness, holds wealth of wisdom in his right hand like Amalaka. He should give that knowledge like the sun to a pupil who desires to acquire wisdom, name and fame among enlightened persons. He who opens his gates of knowledge for the benefit of a doer of noble deeds, enjoys desirable happiness.

PURPORT

As the sun gives delight to all by illumining all objects, in the same manner, learned persons observing the vow of non-violence, gladden all by giving the light of knowledge.

THE COMMENTATOR'S NOTES

(विहाया:) शुभगुणव्याप्त: = Virtuous and great.

(तरणि:) तारक:

= Taking across the ocean of misery or the sun dispelling all darkness.

(अरति:) प्रापक:

= The sorce of happiness of knowledge.

TRANSLATOR'S NOTES

विहाया इति महन्नाम (निघ० ३.३)

वि –|– हाक् = गतौ गतेस्त्रिष्वर्थेषु प्राप्त्यर्थग्रहणमत्र

अरति: is derived from ऋ-गतिप्रापणयो: अत्र प्रापणार्थं

ग्रहणं कृतं महर्षिणा दयानन्देन सुखस्य ज्ञानस्य वा प्रापकः
पुनस्ते किं कुर्युरित्याह ।

What should learned men do is taught further in the Seventh Mantra.

Mantra –7

स मानुषे वृजने शन्तमो हितो३ग्निर्यज्ञेषु जेन्यो न विश्पतिः
प्रियो यज्ञेषु विश्पतिः । स हव्या मानुषाणामिळा कृतानि
पत्यते । स नस्त्रासते वरुणस्य धूर्तेर्महो देवस्य धूर्तेः ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

यः प्रियः विश्पतिः नः (अस्मान्) धूर्तेः त्रासते स धूर्तेः महः देवस्य वरुणस्य सकाशात् यज्ञेषु मानुषाणाम् इष्टा कृतानि हव्या (स्थिरीकरोति) स सर्वैः पत्यते यः यज्ञेषु अग्निः इव जेन्यः न विश्पतिः मानुषे वृजने हितः शन्तमः (भवति) स सर्वैः सत्कर्तव्यः भवति) ॥

TRANSLATION

A learned leader who like a dear and victorious protector of the people or King, preserves us from a violent person and preserves us by association of a scholar who is destroyer of ignorance and giver of knowledge, all acceptable and refined words of men in all Yajnas or unifying good dealings. He is approached like the fire in the Yajnas by all, as he is a benefactor and the best giver of peace and joy in the path to be trodden upon by men. He must be respected by all people.

PURPORT

It is only such learned persons as urge upon all men to tread upon the path of righteousness, are protectors of the people and removers of fear of robbers and thieves etc. like a just King, are friends of the scholars, that can remove all superstition.

THE COMMENTATOR'S NOTES

(वृजने व्रजन्ति यस्मिन् मार्गे तस्मिन् पृषोदरादिना-स्य सिद्धिः)

= On the path by which men go.

(इष्टा) सुसंस्कृतानि वचनानि = Refined words.

(धूर्तः) १ हिंसकस्य = Of a violent person

२ अविद्याहिंसकस्य = Of a destroyer of ignorance.

TRANSLATOR'S NOTES

इष्टेति वाङ्नाम (निघ०१.११)

The word धूर्तिः is derived from ध्वृ About which it is clearly stated by Yaskacharya in Nirukta ध्वरति हिंसाकर्मा (निरुक्ते १.८) It is on the basis of the Nighantu 2. 19.

ध्वरति बधकर्मा (निघ० २.१९)

कस्य समागमेन किं प्राप्तव्यमित्याह

What could be obtained by whose association is told in the eighth Mantra.

Mantra—8

अ॒ग्निं होता॑रमीळते॒ वसु॑धितिं प्रि॒यं चेति॑ष्ठमर॒तिं न्ये॑रिरे

ह॒व्य॒वाहं॒ न्ये॑रिरे। वि॒श्वायुं॑ वि॒श्ववे॑दसं॒ होता॑रं यज॒तं क॒विम्।

दे॒वासो॑ र॒ण्वमव॑से वसू॒यवो॑ गी॒र्भी र॒ण्वं व॑सू॒यवः॑ ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे मनुष्याः ! ये देवासः यम् अग्निम् इव होतारं वसुधितिम् अरतिं हव्यवाहं चेतिष्ठं प्रियं विद्वांसं जिज्ञासवः न्येरिरे विश्वायुं विश्ववेदसं होतारं यजतं कविं रण्वं वसूयवः इव न्येरिरे वसूयवः अवसे गीर्भिः रण्वम् ईळते तान् यूयम् अपि ईळध्वम् ॥

TRANSLATION

O men, you should also praise that person who is shining like the fire, is giver of happiness, the possessor of the wealth of wisdom, the beloved, most enlightener and highly educated, as he is approached and praised by all seekers of Truth. Praise him like the desirous of wealth (material as well as spiritual) who is the conveyor of all good objects, who knows all things, who is the possessor of all wealth, acceptor of what is given to him with love and reverence or of all virtues,adorable, a great poet and Philosophic preacher of Truth. Approach him for protection as men desirous of wealth approach a sovereign with refined words who is truthful

PURPORT

O men, you should also acquire the knowledge of various sciences by the service and association of those highly educated and wise persons, as enlightened persons do by so doing.

THE COMMENTATOR'S NOTES

(अरतिम्) प्राप्तविद्यम्

= To him who acquires knowledge.

(विश्वायुम्) यो विश्वं सर्वं बोधमेति तम्

= To him who gets all knowledge

(रण्वम्) १ सत्योपदेशकम् = To the preacher of Truth.

(रण्वम्) २ सत्यवादिनम् = To the speaker of Truth.

TRANSLATOR'S NOTES

अरतिम् is derived from ऋगतिप्रापणयोः hence Rishi Dayananda Sarasvati has taken the second meaning and interpreted it as प्राप्तविद्यम् रण्वम् is from रण-शब्दे hence the meaning of speaker and preacher of truth. Even the fautly translation of Prof. Wilson and Griffith proves that here Agni is not material fire but a conscious being. Wilson's translation of चेतिष्ठम् is "thoughtful," विश्ववेदसम् has been translated by him as "who knows all things" कविम् has been translated by him as "sage."

Griffith has translated चेतिष्ठम् as "most thougtful विश्ववेदसम् has been translated as'who knoweth all' कवि has been rendered into English by him as"sage."These epithets can not be used for inanimate material fire, but either for God or a great scholar as interpreted by Rishi Dayananda Sarasvati.

In this hymn, there is the mention of the attributes of a learned person as in the previous hymn, so it is connected with the same.

Here ends the commentary on the 128th hymn and fifteenth Varga of the first Mandala of the Rigveda.

अथैकोनत्रिंशदुत्तरशततमं सूक्तम्

HYMN - CXXIX (129)

अस्यैकादशर्चस्य सूक्तस्य परुच्छेप ऋषिः। इन्द्रो देवता। १, २ निचृदत्यष्टिः। ३ विराडत्यष्टिश्छन्दः। गान्धारः स्वरः। ४ अष्टिः। ६, ११ भुरिगष्टिः। १० निचृदष्टिश्छन्दः। मध्यमः स्वरः। ५ भुरिगतिशक्वरी। ७ स्वराडतिशक्वरी। पंचमः स्वरः। ८, ९ स्वराट् शक्वरी। पंचमः स्वरः। ८, ९ स्वराट् शक्वरी। धैवतः स्वरः॥

Seer-Paruochepa. Devata or subject Indra. Metres Atyasthi, Ashti and Shakvari in various forms. Tunes-Panchama and Dhaivata.

What should learned men do is told in the first Mantra.

Mantra—1

यं त्वं रथमिन्द्र मेधसातयेऽपाका सन्तमिषिर प्रणयसि प्रानवद्य नयसि। सद्यश्चित्तमभिष्टये करो वशश्च वाजिनम्। सास्माकमनवद्य तूतुजान वेधसामिमां वाचं न वेधसाम्॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे इषिर इन्द्र त्वं मेधसातये यमपाका सन्तं रथं प्रणयसि इव विद्यां प्रणयसि च हे अनवद्य वशः त्वम् अभिष्टये च वाजिनं चितं सद्यः करः। हे तूतुजान अनवद्य स त्वम् अस्माकं वेधसां न वेधसाम् इमां वाचं कर॥

TRANSLATION

O Indra (President of the Assembly) desiring the welfare of all as thou takest thy car which is free from all misery caused by ignorance, for proper distribution of the pure articles thou leadest men to knowledge. O pure, free from all fault, desirous of doing good, make thou the man devoted to thee as full of knowledge soon for the fulfilment of his

desires. O faultless and prompt, accept this our speech which is of the wise, of persons who are endowed with pure intellect and preach it to others.

PURPORT

Those scholars who prompt all men to acquire knowledge and have humility, can accomplish all desirable objects.

THE COMMENTATOR'S NOTES

(इन्द्र) विद्वन् सभेश
= The learned President of the Assembly.
(अपाका) अपगतम् अविद्याजन्यं दुःखं यस्य
= Free from the misery caused by ignorance.
(वाजिनम्) प्रशस्तज्ञानवन्तम्
= Full of good knowledge.
(तूतुजान) क्षिप्रकारिन् = Prompt.
(वेधसाम्) मेधाविनाम् = Of the geniuses

TRANSLATOR'S NOTES

Indra is from इदि-परमैश्वर्ये वाजिनम् is from वज-गतौ अत्र गतेस्त्रिष्वर्थेषु ज्ञानार्थग्रहणम् तूतुजान इति क्षिप्रनाम (निघ० २.१५) वेधा इति मेधाविनाम (निघ० ३.१५) पुनर्विद्वांसः कीदृशा भवन्तीत्याह ।

How are learned men is told further in the Second Mantra.

Mantra—2

स श्रुधि यः स्मा पृतनासु कासु चिद्दक्षाय्यं इन्द्र भरहूतये नृभिरसि प्रतूर्तये नृभिः । यः शूरैः स्वः सनिता यो विप्रैर्वाजं तरुता । तमीशानास इरधन्त वाजिनं पृक्षमत्यं न वाजिनम् ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे इन्द्र (सेनेश) यः त्वं प्रतूर्तये नृभिः इव नृभिः भरहूतये कासु चित् पृतनासु दक्षाय्यः असि यः त्वं शूरैः स्वः स्वः सनिता यः विप्रैः वाजं तरुता वाजिनम् अत्यं न (इव) पृक्षं वाजिनं धरसि तं त्वाम् ईशानासः इरधन्त स स्म एव न्यायं श्रुधि ॥

TRANSLATION

O Indra (Commander of the army) Hear our invocation thou who in various battles and competitions of the protectors of men, for quick action art animated by leading men and art expert in thy official duties. Thou art the sharer of happiness with heroes and of the knowledge with wise men. Thou upholdest or supportest a learned person who is giver of happiness, like a fleet course. Mighty persons and lords of wealth praise thee and act like the inspirers of act.

PURPORT

Those persons who lead men to the discharge of their duties towards the State along with the learned Judges and Magistrates, become givers of happiness and joy among the people.

THE COMMENTATOR'S NOTES

(इन्द्र) सेनेश = O Commander of the army.

(प्रतूर्तये) सद्योऽनुष्ठानाय = For prompt action.

(इरधन्त) ये इरान् इलान् प्रेरकान् दधति ते इरधास्त इव आचरन्तु ।

= Let them act like the upholders or supporters of the inspirers of good actions.

(पृक्षे) सुखैः सेचकम् = Fillers with delight.

TRANSLATOR'S NOTES

सेना वा इन्द्राणी (मैत्रायणी २, २, ५) काठक १०.१०

When सेना is इन्द्राणी (Indrani) it is clear that the word इन्द्र stands for सेनेश or Commander of the army. Rishi Dayananda Sarasvavti's interpretation is therefore quite authenticated. The following passages from Taittireeya Brahmana 2. 4. 2, 7-8 also clearly substantiate it. Here the word Indrani stands with सेना or army.

सेना ह नाम पृथिवी धनंजयाविश्वव्यचा अदितिः सूर्यत्वक् । इन्द्राणी देवी प्रासहाददाना साते देवी सुहवा शर्मयच्छतु । (तैत्तिरीय ब्राह्मणे २, ४, २, ७, ८)

पुनः के जगदुपकारका भवन्तीत्याह ।

Who are benefactors of the world is told further in the third Mantra.

Mantra—3

दस्मो हिष्मा वृषणं पिन्वसि त्वचं कं चिद्यावीररुं शूर मर्त्यं परिवृणक्षि मर्त्यम् । इन्द्रोत तुभ्यं तद्दिवे तद्रुद्राय स्वयंसे । मित्राय वोचं वरुणाय सप्रथः सुमृळीकाय सप्रथः ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे शूर इन्द्र (हि) यतः दस्यः त्वं य किंचित् त्वचं यावीः वृषणम् अररुं मर्त्यम् परिवृणक्षि पिन्वसि अतः तस्मै स्वयशसे मित्राय तुभ्यं च तद् वोचं दिवे रुद्राय वरुणाय सुमृळीकाय सप्रथः इव इव सप्रथः अहं तत् उत स्म वोचम् ॥

TRANSLATION

O brave President of the Assembly, Thou art destroyer of thy foes, and subduer of those wicked persons who cover (amnihilate) righteousness. Thou servest those mortals who are showerers of knowledge and thereby conveyors of delight to all, making them free to do noble deeds. Therefore I free do to noble deeds who get good reputation on account of virtues, praise thee and utter glorifying words to thee that

cousest wicked men to weep, glorious and good friend of all, giver of good happiness and desiring welfare of all good people.

PURPORT

Those persons are givers of great delight and joy to all who preach truth to all with friendliness and observe righteousness in their dealings.

THE COMMENTATOR'S NOTES

(वृषणम्) विद्यावर्षकम् = Showerer of knowledge.
(अररुम्) प्रापकम्
= Conveyor of happiness and knowledge.
(ऋ-गतिप्रापणयोः अत्र प्राप्त्यर्थ ग्रहणम्) Tr.

पुनर्मनुष्यैः कैः सह किं कर्तव्यमित्याह

What should men do with whom is told in the fourth Mantra.

Mantra—4

अस्माकं व इन्द्रमुश्मसीष्टये सखायं विश्वायुं प्रासहं युजं वाजेषु प्रासहं युजम् । अस्माकं ब्रह्मोतयेऽवा पृत्सुषु कासु चित् । नहि त्वा शत्रुस्तरते स्तृणोषि यं विश्वं शत्रुं स्तृणोषि यम् ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे मनुष्याः यथा वयम् अस्माकं वः (युष्माकं) च इन्द्रं (परमैश्वर्ययुक्तं) वाजेषु पृत्सु कासुचित् प्रासहं युजं विश्वायु सखायम् इष्टये उश्मसि (तथा यूयमपि कामयध्वम्) हे विद्वन् अस्माकम् ऊतये त्वं ब्रह्म अव) एवं सति यं विश्वं शत्रुं स्तृणोषि यं च विरोधिनं स्तृणोषि स शत्रुः त्वा नहि स्तरते ॥

TRANSLATION

O men, as we desire Indra (wealthy Commander of the army or the President of the Assembly) to be present at our Yajnas and in the battlefields as he is our friend and your friend, is endowed with all noble qualities, the subduer of enemies, is a Yogi (man of self control) for the fulfilment of our noble desires, so you should also do. Do thou O learned Indra, guard or preserve our Vedic knowledge, for our protection in whatever contest thou mayest engage, no enemy whom thou opposest, prevails against thee, thou prevailest over every one whom thou opposest.

PURPORT

Men should try to get many friends according to the best of their ability. But un-righteous and wicked persons should not be made friends. By so doing, the power of wicked enemies does not increase.

THE COMMENTATOR'S NOTES

(विश्वायुम्) प्राप्तसमग्रशुभगुणम्

= Endowed with all noble qualities.

आयु is from अय-गतौ अत्र प्राप्त्यर्थं ग्रहणम्

(युजम्) १ योगयुक्तम् = Practiser of Yoga.

योक्तारम् = Unifier.

(पृत्सु) संग्रामेषु पृत्सुरिति संग्रामनाम (निघ० २.१७)
कौऽत्र सुखदायी भवीत्याह ।

Who is giver of happiness here in this world is told in the fifth Mantra.

Mantra—5

नि ष्पू नमातिमतिं कयस्य चित्तेजिष्ठाभिररणिभिर्नोतिभिः-
रुग्राभिरुग्राभिरुग्रोतिभिः । नेर्षि णो यथा पुरानेनाः शूर
मन्यसे । विश्वानि पूरोरप पर्षि वह्निरासा वह्निर्नो अच्छ ।

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे उग्र शूर विद्वन् त्वं तेजिष्ठाभिः अरणिभिः उग्रियाभिः ऊतिभिः न ऊतिभिः प्रतिमति विनम। यथा अनेनाः पुरा नयति तथा नः मन्यसे सुनेषि आसा वह्निः इव नः अच्छ पर्षि कयस्य पूरोः चित् वह्निः त्वं विश्वानि दुःखानि अपनेषि (स त्वम् अस्माभिः सेवनीयः असि) ।।

TRANSLATION

O powerful learned person, full of splendour ! thou shouldst bow before a highly intelligent person with thy powerful aids and protections which lead to happiness. As a sinless person leads a man forward, in the same manner, thou knowest us well and leadest us on beautifully and guidest us. Thou takest us forward well from near like the fire. Thou alleviatest all our suffering like the fire, being the bearer of even a learned man. Thou art therefore to be always worshipped by us.

PURPORT

Only that man can enjoy all happiness, who always augments the intellect of men and afterwards creates hatred or repulsion for sins.

THE COMMENTATOR'S NOTES

(अरणिभिः) सुखप्रापिकाभिः = Leading to happiness. ऋ-गतिप्रापणयोः

(आसा) अन्तिके = Near.

(पूरोः) विदुषो मनुष्यस्य पूरवइति मनुष्यनाम (निघ० २.३) = Of a learned person.

(कयस्य) विज्ञातुः = Of a knower.

TRANSLATOR'S NOTES

आसा इत्यन्तिकनाम (निघ० २.१६)

केभ्योविद्या देयेत्याह ।

To whom knowledge should be given is taught in the sixth Mantra.

Mantra—6

प्र तद्वोचेयं भव्यायेन्दवे हव्यो न य इषवान्मन्म रेजति रक्षोहा मन्म रेजति । स्वयं सो अस्मदा निदो वधैरजेत दुर्मतिम् । अव स्रवेदघशंसोऽवतरमव क्षुद्रमिव स्रवेत् ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

अहं स्वयं यथा हव्यः रक्षोहा मन्म रेजति न यः इषवान् मन्म रेजति तत् भव्याय इन्दवे प्रवोचेयम् । यः अस्मत् (शिक्षां प्राप्य) वधैः निदः दुर्मतिं च अजेत सः अवतरं क्षुद्रम् इव अवस्रवेत् । यः अघशंसः अवस्रवेत् (तं वाढं दण्डयेत्) ॥

TRANSLATION

Let me impart this worthy knowledge, to a pupil who desires to acquire it and who is kind-hearted. Let me impart it like an acceptable (popular) wise man, who is destroyer of ignoble attributrs, acts and temperament and who gives it to others, after collecting it profusely. Let the pupil having acquired this good knowledge keep it away from a scorner and drive away all evil intellect with his destructive force. Far let him flee away who praises wickedness and vanish like a mote of dust. Let him be punished severely.

PURPORT

A scholar should impart the knowledge of all sciences to the pupils who are endowed with good qualities, actions and temperament. Those who are scorners, thieves and given to censuring, should be driven away. The teacher himself should be of righteous nature and spotless character.

THE COMMENTATOR'S NOTES

(मन्म) १ मन्तुं योग्यं ज्ञानम्

= Knowledge that is to be pondered over or reflected upon well.

(मन्म) २ ज्ञातुं योग्यम्

= That is worthy of being known well.

(अवस्रवेत्) दण्डयेत् = Should punish.

(इन्दवे) आर्द्राय = Of mild nature or kind hearted.

TRANSLATOR'S NOTES

मन्म is from **मन-ज्ञाने**

इन्दु is derived from **उन्दी - क्लेदने उन्देरिच्चादेः उणादि १.१२ इति उः प्रत्ययः आदिवर्णस्य इकारादेशश्च ॥**

पुनर्मात्रादिभिः सन्तानादयः कथमुपदेष्टव्या इत्याह ।

How should children be taught by mothers and others is told in the seventh Mantra.

Mantra—7

वनेम॒ तद्धोत्र॑या चि॒तन्त्या॑ व॒नेमं र॒यिं र॑यिवः सु॒वीर्यं॑ र॒ण्वं

सन्तं॑ सु॒वीर्य॑म् । दु॒र्मन्मा॑नं सु॒मन्तु॑भि॒रेमि॒षा पृ॑चीमहि ।

आ स॒त्याभि॒रिन्द्रं॑ द्यु॒म्नहू॑तिभि॒र्यज॑त्रं द्यु॒म्नहू॑तिभिः ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे रयिवः ! यथा वयं होत्रया चितन्त्या यत् ज्ञानं वनेम सुवीर्यं रयिं सन्तं रण्वं सुवीर्यं च वनेम सुमन्तुभिः ईम् इषा च दुर्मन्मानम् आपृचीमहि द्युम्नहूतिभिः द्युम्नहूतिभिः इन्द्रम् आपृचीमहि तथा तत् एतत् त्वं वन पृङ्क्ष्व ॥

TRANSLATION

O wealthy person, as we acquire and distribute good knowledge with the speech that is acceptable (pleasant) and

giver of instruction, so thou shouldst also do. We solicit wealth, good vitality, a learned person who is endowed with Vidya (Wisdom) and Dharma (Righteousness) and is possessor of good spiritual power on account of them, preaching always the Truth. May we attain the knowledge of God whom it is difficult to know, with the association of enlightened wisemen and strong will and establish contact with such wise persons who are destroyers of all evils. May we attain or have communion with the Adorable God by true and earnest invocations. May we also have contact with adorable enlightened persons in inviting them sincerely and honouring them with wealth and praise.

PURPORT

Parents and enlightened persons should teach their children and pupils, in this manner. You should imitate only our righteous acts and conduct and not what may not be righteous or noble. In this way, you should advance prosperity by truthful conduct, good character and benevolence.

THE COMMENTATOR'S NOTES

(होत्रया) आदातुमर्हया (वाण्या)
= By acceptable or pleasant speech.

(इषा) इच्छया = By strong will.

(रण्वम्) उपदेशकम् = Preacher of truth.

TRANSLATOR'S NOTES

होत्रेतिवाङ्नाम (निघ० १.११)

(रण्वम्) is derived from रण-शब्दे

इष-इच्छायाम्

पुनर्मनुष्याः किंकृत्वा कीदृशा भवेयुरित्याह ।

How should men become and by doing what is taught in the 8th Mantra.

Mantra—8

प्रमां वो अस्मे स्वयंशोभिरूती परिवर्गे इन्द्रो दुर्मतीनां
दरीमन्दुर्मतीनाम् । स्वयं सा रिषयध्यै या नं उपेषे अत्रैः ।
हतेमसन्न वक्षति क्षिप्ता जूर्णिर्न वक्षति ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

(हे मित्राणि) वः अस्मे इन्द्र दुर्मतीनां परिवर्गे दुर्मतीनां दरीमन् च स्वयशोभिः ऊती प्र प्रवक्षति या सेना न उप इषे अत्रैः क्षिप्ता सा रिषयध्यै प्रवृत्ता स्वयम् ई हता असत् किन्तु सा जूर्णिः न वक्षति ॥

TRANSLATION

O friends, Indra (Commander of the army) is powerful in overcoming the male-volent by his self-glorifying protections, granted unto you and unto us. He is the tearer of the malevolent and the wicked into pieces. The impetuous host that is sent against us by devouring foes to destory us, has been itself destroyed. It will not reach us, it will not do us any harm.

PURPORT

Those persons become exceedingly prosperous, who having given up the association of the wicked, keeping company with righteous persons, get good reputation and protect the people with most admirable army.

THE COMMENTATOR'S NOTES

(परिवर्गे) परितः सर्वतः सम्बन्धे

= In contact from all sides.

(दरीमन्) अतिशयेन विदारणे अत्र अन्येषामपि दृश्यत इत्युपधा दीर्घः सुपांसुलुक् इति सप्तम्या लुक्

= In the act of tearing the foes.

(अत्रैः) अतन्तीत्याततायिनः तान् गच्छन्तीत्यत्राः

शत्रवस्तैः = By enemies.

(जूर्णिः) क्षिप्रकारिणी = Active.

TRANSLATOR'S NOTES

जूर्णिरिति क्षिप्रनाम (निघ० ३. २. १५)

दरीमन् is from दॄ-विदारणे ।

पुनरुपदेशकैः कथं वर्तितव्यमित्याह ।

How should preachers behave is told in the ninth Mantra

Mantra—9

त्वं नं इन्द्र राया परीणसा याहि पथा अंनेहसां पुरो

यांह्यरक्षां । सचंस्व नः पराक आ सचंस्वास्तमीक आ ।

पाहि नो दूरादभिष्टिभिः सदा पाह्यभिष्टिभिः ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे इन्द्र (विद्वन्) त्वं परीणसा राया नः (अस्मान्) पाहि अनेहसा (अरक्षसा) पथा पुरः याहि । नः पराके आसचस्व । अस्तमीके (समीपे) अस्मान् आ सचस्व । अभिष्टिभिः दूरात् आरात् च नः पाहि । सदा अभिष्टिभिः अस्मान् पाहि ॥

TRANSLATION

O learned persons, endowed with the wealth of wisdom, come to us with abundant riches (spiritual or material) by a path free from evil or through a non-violent Dharma, by a path, un-obstructed by wicked persons. Be with us when afar, be with us when nigh, favour us whether afar or nigh with the objects of our desires; ever favour us with desirable or agreeable activities

PURPORT

It is the duty of the preachers, to tread upon the path of Dharma (righteousness) and to prompt others to do so. They

should be united with all whether they are far or near, through their sermons. They should always protect all by imparting true knowledge and dispelling all their wrong ideas.

THE COMMENTATOR'S NOTES

(पराके) पराक इति दूरनाम (निघ० ३.२६) =Far.

(अस्तमीके) समीपे = Near.

अस्तमीक इति समीपनाम (निघ० २.१६) Tr.

पुनर्मनुष्याः कीदृशा भवेयुरित्याह

How should men be is told further in the tenth Mantra.

Mantra—10

त्वं न॑ इन्द्र रा॒या तरू॑षसो॒ग्रं चि॑त्त्वा महि॒मा स॑क्ष॒दव॑से म॒हे मि॒त्रं नाव॑से । ओजि॑ष्ठ त्रात॒रवि॑ता॒ रथं॒ कं चि॑दमर्त्य ।
अ॒न्यम॒स्मद्रि॑रिषेः॒ कं चि॑दद्रिवो॒ रिरि॑क्षन्तं चिदद्रिवः ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे इन्द्र! तरूषसा राया महे अवसे मित्रं न इव अवसे यं त्वा महिमा सक्षत स त्वं चित् नः (अस्मान्) पाहि । हे अद्रिवः त्वम् अस्मत्त कंचित् अन्यं रिरिषेः । हे अद्रिवः त्वं रिरिक्षन्तम् उग्रं चित् रिरिषेः ॥

TRANSLATION

O wealthy King ! Sustain us with wealth that transports man beyond calamity, for our great protection like a friend, as thy glory is great. O most potent immortal (on account of fame) Indra (King), our defender and preserver, ascend on some good chariot and come to us. O full of splendour like the sun, devourer of foes, repel any one assailing us. O King of vast State containing some hills, repel a mighty wicked person who wants to kill us.

PURPORT

The greatness of men consists in the protection of righteous persons and destruction of the wicked and ignoble.

THE COMMENTATOR'S NOTES

(तरूषसा) तरन्ति शत्रुबलानि येन तत् तरुषः तेन

= By which a man transports beyond calamity caused by the foes.

(अद्रिवः) १ अद्रयो बहवो मेघा विद्यन्ते यस्मिंस्तत् सूर्ये तमिव तेजस्विन्

= Full of splendour like the sun destroying many clouds.

२ बहुशैलराज्ययुक्तः = King of a Vast State having some hills and mountains.

(रिरिक्षन्तम्) रेष्टुं हिंसितुम् इच्छन्तम्

= Desiring to kill.

TRANSLATOR'S NOTES

रिष-हिंसायाम् अद्रिरितिमेघनाम (निघ० १.१६)

पुनर्विदुषां किं कर्तव्यमस्तीत्याह

What is the duty of learned men is told further in the eleventh Mantra.

Mantra—11

प्राहि नं इन्द्र सुष्टुत स्रिधोऽवयाता सदमिद्दुर्मतीनां देवः सन्दुर्मतीनाम् । हन्ता पापस्य रक्षसस्त्राता विप्रस्य मावतः । अधा हि त्वा जनिता जीजनद्वसो रक्षोहणं त्वा जीजनद्वसो ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे सुस्तुत इन्द्र अवयाता देवः सन् दुर्मतीनां सदम् इव

दुर्मतीनां प्रचारं हत्वा स्त्रिधः नः (अस्मात्) पाहि । हे वसो ! जनिता रक्षोहणं यं त्वा जीजनत् यं त्वा रक्षकं जीजनत् स हि त्वम् अध पापस्य रक्षसः हन्ता मावतः विप्रस्य त्राता भव ।

TRANSLATION

O deservedly lauded Indra (King or President of the Assembly) preserve us from suffering and its cause-sin. Desiring truth and justice and always going against the wicked, thou art verily the Chastiser of the malevolent, thou art the chastiser of the wicked ignoble persons. O support of men, making them to dwell in the light of knowledge, the Progenitor (God) has made thee, the destroyer of the Rakshasas (wicked persons). He has made thee the protector of the righteous. Therefore, being slayer of the sinners and wicked, be the protector or preserver of a righteous wiseman like me.

PURPORT

This is the admirable work of the enlightened persons, to refute or condemn sin and to support Dharma (Righteousness) None should keep company with unrighteous persons and give up the association of the noble righteous persons.

THE COMMENTATOR'S NOTES

(स्त्रिधः) दुःखनिमित्तात् पापात्

= From sin that is the cause of suffering.

(वसो) यः सज्जनेषु वसति तत्सम्बुद्धौ

= Dwelling among good men

२ विद्यासु वासयितः

= Making the people dwell in various sciences i. e. making them learned.

This hymn is connected with the previous hymn, as there is mention of the duties of a learned person and a King.

Here ends the commentary on the 129th hymn and seventeenth Varga of the Rigveda.

अथ त्रिंशदुत्तरशततमं सूक्तम्

HYMN CXXX (130)

अस्य दशर्चस्य सूक्तस्य परुच्छेप ऋषिः । इन्द्रो देवता । १, ५ भुरिगष्टिश्छन्दः । २, ३, ६, ९ स्वराडष्टिः । ८, ४ अष्टिश्छन्दः । मध्यमः स्वरः । ७ निचृदत्यष्टिश्छन्दः । गान्धारः स्वरः । १० विराट् त्रिष्टुप् छन्दः । धैवतः स्वरः ।

Seer of the hymn - Parucchepa. Devata or subject-Indra. Metres Ashti of various forms and Trishtup. Tunes-Gandoharva and Dhaivata.

अथ राजप्रजाजनाः कथं प्रीत्या वर्तेरन्नित्याह ।

How the rulers and their subjects should behave lovingly towards one another other is tald in the first Mantra.

Mantra—1

एन्द्र याह्युप नः परावतो नायमच्छा विदथानीव सत्पतिरस्तं राजेव सत्पतिः । हवामहे त्वा वयं प्रयस्वन्तः सुते सचा । पुत्रासो न पितरं वाजसातये मंहिष्ठं वाजसातये ।

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे इन्द्र ! **अयं विदथानि इव आयाति अतः त्वं नः (अस्मान्) परावतः न उपआयाहि सत्पतिः त्वं नः (अस्माकम्) अस्तम् उपायाहि । प्रयस्वन्तः वयं सचा सुते वाजसातये च पुत्रासः पितरं न (इव) मंहिष्ठं त्वा अच्छ हवामहे ।।**

TRANSLATION

O Indra (Wealthy King or President of the Assembly) as the enemy is coming to the battlefield, come to us quite closely, come to our house, as a good king who is protector of the righteous people and preserver of true conduct comes to the assembly or to the houses of his subjects when invited cordially. Being industrious, we praise and invite

thee, we invoke thee as sons invite a father as thou art the most liberal donor and most adorable. We invoke thee for the proper distribution of the articles and for the distribution of various duties or departments in connection with a battle.

PURPORT

All officers of the State and the people should be industrious.

THE COMMENTATOR'S NOTES

(विदथानिइव) संग्रामान् इव = Like the battles.

(प्रयस्वन्तः) बहुप्रयत्नशीलाः = Very industrious.

(मंहिष्ठम्) अतिशयेन पूजितम्

= Much respected or adorable.

(वाजसातये पदार्थविभागाय

= For the distribution of articles or wealth.

२ युद्ध विभागाय

TRANSLATOR'S NOTES

प्रयस्वन्तः is from यसु-प्रयत्ने hence the meaning of बहुप्रयत्नशीलाः by Rishi Dayananda Saraswati.

पुनस्तमेव विषयमाह ।

The same subject is continued.

Mantra—2

